This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद निमित्त मा धिक्कार

२ श्रीगणेशायनमः॥ ननुशिवशब्दवाच्यस्येश्वरस्यअस्मच्छब्दवाच्यजीवाभेदःकथं॥ मानाभावादितिचेन्न॥जीवेश्वरभेदस्याप्रामाणिकत्वेनतद्भेदस्यप्रामाणिकत्वात्॥ विरुद्धयोरेकत्वायोगादितिन्यायात्॥ तद्वेन प्रत्यक्षंप्रमाणं॥ तथाहि॥ किंबहिरिंद्रियजन्यंप्रत्यक्षंप्रमाणंमानसेंद्रियप्रत्यक्षंप्रमाणंवा॥ नाद्यः॥ तत्तद्विंद्रियप्रवृत्तिरूपा घ्नानाश्रयत्वेनाधिकरंप्रतियोगिनो बहिरिंद्रियायोग्यत्वात्॥ नांत्यः॥ मनसइंद्रियत्वेमानाभावात्॥ मनःषष्ठानींद्रियाणीतिवचनमेवप्रमाणमितिचेन्न॥ ज्ञानेंद्रियेणापिमनसा ऋत्विग्भिन्नयजमानेनइडाभक्षकऋत्विग्गतपंचत्वसंख्यापूरणवेंद्रियगतषष्ठत्वसंख्यापूरणे विरोधाभावात्॥ नचेंद्रियाणांमनःषष्ठानीत्यादिनाइंद्रियत्वंमनसोवा[illegible]म्यतइतिसच्यं॥ नक्षत्राणामहंशशीत्यादौव्यभिचारेणतन्नियमाभावात्॥ इंद्रियेभ्यःपराह्यर्थाह्यर्थेभ्यश्चपरंमनइत्यादौ॥ एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचेतिश्रुतौचमनइंद्रियभेदश्रवणाच्च॥ [illegible]॥ किंचमनःनेंद्रियंप्रमाणांतरसहकारित्वात्॥ ऐंद्रियकविशेषगुणजातीयानाश्रयत्वात्॥ निरवयवद्रव्यत्वात् ज्ञानासमवायीकारणसंयोगाश्रयत्वात्॥ प्रमानाश्रयत्वाच्च॥ कालादिवत्॥ आत्मवच्च॥ व्यतिरेकेणचक्षुरादिवच्च॥ अन्यथाप्रमाणांतरसहकारित्वादिकमेवनस्यात्॥ नचरमहेतोरसिद्धिः॥ तयोरन्यःपिप्पलंस्वाद्वत्तिकामःसंकल्पइत्यादिश्रुत्याप्रमादेरंतःकरणधर्मत्वावगमेनगात्॥ ननुसुखादिप्रत्यक्षंइंद्रियजन्यं॥ जन्यप्रत्यक्षत्वात्॥ करणंक्रियात्वात्॥ इत्यनुमानद्वयेनमनसएवइंद्रियत्वंसिध्यतिइतिचेन्न॥ हेतोरसिद्धिः॥ बुद्धिपूर्वकंसुखादिव्यवहारं॥ व्यवहर्तव्यज्ञानसामान्यपूर्वकं॥ व्यवहारत्वात् संमतवदित्यनुमानेनलाघवसहकृतेनपरमतेईश्वरनिष्ठकर्तृत्ववत् दुःखादिगोचरज्ञानस्यापिएकत्वानित्यत्वसिद्धौजन्यत्वासिद्धेः॥ नचेदमनुमानंदुःखज्ञानमुत्पन्नंविनष्टंइत्यनुभवबलेन बाधितमितिवाच्यं॥ परमते॥ रूपसंबधोत्पत्तिविनाशानुभववदावश्यकविशेषणीभूतदुःखाद्युत्पत्तिविनाशविषयत्वेनान्यथासिद्धत्वेनतज्ज्ञानस्योत्पत्तिविनाशित्वकल्पनेगौरवात्॥ नचैवंसुखादिज्ञानमुत्पन्नमित्यत्रापिविशेषणीभूतस्फुरणोत्पत्त्यादिविषयकत्वस्यज्ञानस्यानुभवेनसिद्धांतविरोधइतिवाच्यं॥ आनंदाद्ध्येवखल्विमानिभूतानिजायंते॥ नित्यंस्वल्विरंप्रत्येष्यादिश्रुत्यापरमप्रेमास्पदत्वेनचसुखमहमस्वाप्समितिसुप्तोत्थितस्यसुषुप्तौजन्यसुखानुभवेपिसौषुप्तिकस्फुरणानुभवदर्शनेन आत्मनएवस्फुरत्वावगमेनसुखस्यनित्यत्वावगमात्॥

॥१॥ ॥१॥

KKSU LIBRARY RAMTEK 441106 M-858 Dist Nagpur

Acc No. 7026 M858
Title- भेदधिक्कार पत्र-26.
Checked 2012
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद म धिकार०

तदुत्पत्त्याद्यनुभवानंतरं स्वस्य सुखादिव्यत्तुसादिविषयकत्वेनाप्युपपत्तेः।। न चैवं दुःखं संभाति।। रुच्छायित्वग्राहकमाना
भावात्।। किंच दुःखादिगोचरमित्यज्ञानानंगीकारे सुखी दुःखी स्याद्यनुभवानंतरं कदाचिन्मम सुखमनुभूयते न वा इत्यादि
संशयः स्यात्।। ग्राह्यानुभवगोचरनिश्चयाभावात्।। अन्यथा अनवस्थापत्तेः।। न च सुखादिगोचरजन्यानुभवस्यैव स्व
प्रकाशत्वं कल्प्यत इति दोष इति वाच्यं।। उभयसिद्धात्मन एव स्वप्रकाशत्वमात्रकल्पने लाघवात्।। तदभिन्नज्ञानं तत्त्वप्रका
शत्वद्वयकल्पने गौरवात्।। घटादिवद्वृत्तिमत्वेन जन्यानुभवस्य स्वप्रकाशत्वायोगाच्च।। किंच सुप्तोत्थितस्य सुखाद्यनुसं
धानदर्शनात् तस्य च सौषुप्तिकानुभवं विना संभवात्।। तदानीं जन्यज्ञानाभावात् सुखाद्यनुभवस्य नित्यत्वसिद्धिः।। न च
सुखमहमस्वाप्सम् इत्यप्रलापवादिना दुःखाभावानुमित्यनंतरं तदनुसंधानमिति वाच्यं सुप्तोत्थितज्ञानस्य दुःखानुल्लेखित्वेन त
दभावावगाहित्वायोगात्।। न च सुखाभाव एव सुखत्वमारोप्य तथानुमितिर्जायत इति वाच्यं।। एवं कल्पनायां मानाभावात्। तदा पराम
।।२।। र्शाभावेन अनुमित्ययोगाच्च।। तदा गौरवेण परामर्शकल्पनायोगस्य दृष्टुरीत्यादिश्रुतेश्च ज्ञाननित्यतासिद्धिः।। तस्मात्सुखा ।।२।।

दिसाक्षात्कारस्य नित्यसाक्ष्यायत्ततया जन्यसाक्षात्कारत्वादिहेत्वसिद्धिरिति न मन इंद्रियं।। ६।। अस्तु वा इंद्रियं।। तथापि नेश्व
वैभेदग्राहकं।। तदसन्निकृष्टत्वात्।। न चेहेत्वसिद्धिः।। संयोगसमवायतादात्म्यानामन्यतमस्य तत्रासंभवात्।। न च तत्र विशे
षणतैव प्रत्यासत्तिरिति वाच्यं।। तत्र केवलविशेषणताप्रत्यासत्तिरिंद्रियसन्निकृष्टाधिकरणविशेषणत्वेनाद्यः।। व्यवहिता
भावप्रसंगात्।। तत्राप्यधिकरणे भावस्य विशेषणतालक्षणस्वरूपसंबंधानपायात्।। नांत्यः शब्दाभावप्रत्यक्षप्रसंगात्।।
श्रोत्रेंद्रियस्यैव शब्दाभावाधिकरणत्वेन तस्य स्वसन्निकृष्टत्वाभावात्।। किंच संयोगो व्याप्यवृत्तिरुताव्याप्यवृत्तिः।।
आद्ये निरवयववृत्तितत्वेन अवयववृत्तितादिरूपावच्छेदकाभावेन तत्र कृ[illegible]वच्छेदेन मनःसंयोगाभावात्।। नेंद्रियसन्निकृष्टवि
शेषणतालाभोऽपि।। न च संयोगस्य अव्याप्यवृत्तित्वमेव संभवति प्रतियोगितदभावयोरेकाधिकरणविरोधात्।। न चावच्छेद
ण कभेदेन विरोधः।। अत एव वृक्षे संयोगवान्मूले नेति अबाधितप्रतीतिरिति वाच्यं।। अधिकरणभेदाभावे ग्रत्वादेरवच्छेदकस्यैवासंत त्व
भवात्।। तथाहि।। तदभाववद्वृत्तित्वे सति तत्सामान्याधिकरण्यं मात्रं वा नाद्यः अग्रत्वस्य वृक्षभेदाभावेन संयोगा
भाववति वृक्षे वृत्तित्वेन तद्वृत्तित्वाभावात्।। नांत्यः प्रमेयत्वादावतिव्याप्तेः।। न चात्राधिकरणभेद एवास्त्विति वाच्यं।। त्व
तदवच्छेदकत्वसामानाधिकरण्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भदे न्मते अवच्छेदकभेदेन अधिकरणभेदानभ्युपगमात्॥ तस्मान्नात्मनि मनःसंयोगसंभवः॥ ननु तर्हि संयोगस्याव्याप्यवृत्तित्वमित्यंत ध्यिका०
पक्षोस्तु॥ तथा च तत्र नोक्तदोषप्रसक्तिरिति चेन्न॥ तथापि तथानभ्युपगमात्॥ प्रत्यक्षबाधाच्च॥ अन्यथा शष्कुलिसंयोगस्याव्याप्यवृत्तित्वेन॥
नभोमात्रस्य कर्णशष्कुल्यवच्छिन्नत्वे न श्रोत्रत्वापत्तौ सर्वशब्देषूपलंभप्रसंगात्॥ तस्मादीश्वरभेदे नेंद्रियसन्निकृष्टविशेषणता
प्रत्यासत्तिसंभवः॥ न च यत्राधिकरणे तर्हि तत्प्रतियोगिसत्तं॥ तर्हि तत्स्वोपलंभापादकं॥ तन्निष्ठविशेषणता प्रत्यासत्तिरिति वाच्य॥
यदा कदाचित्स्वोपलंभापादकं सर्वदा वा॥ नाद्यः॥ व्यवहितप्रदेशे पूर्वं कदाचित्तर्कितप्रतियोगिमतस्तस्य स्वोपलंभापादकत्वसंभवेन
तत्राभावप्रसंगात्॥ नांत्यः॥ अंधकारेषु घटापनयनेपि तदुपलंभापादनेप्रतियोगितव्याप्यतया यावत्तदुपलंभकसामग्रीघटितवि
भाव शेषणताया अभावेन भेदप्रत्यक्षानापत्तेः घटे मनस्त्वाभावप्रत्यक्षप्रसंगाच्च॥ तदुपलंभकसामग्र्यप्रसिद्धेः विशेषणताया इंद्रि
॥३॥ यप्रत्यासत्तित्वे मानाभावाच्च॥ न च घटाभावस्य चाक्षुषत्वानुभवत्वेन तत्राकारणांतरानुपपत्त्या चक्षुषः कारणत्वसिद्धेः ॥३॥
तन्निवारणार्थं विशेषणताप्रत्यासत्तिः कल्प्यत इति वाच्यं॥ घटाभावज्ञानस्य चाक्षुषत्वासिद्धेः सन्निकर्षानिरूपणात्॥
न च विशेषणतैव प्रत्यासत्तिरिति वाच्यं॥ विशेषणतायाः सन्निकर्षसिध्यनंतरं तदधीनचाक्षुषत्वसिद्धिः तत्सिध्यनंतरं विशेष

त

णतायाः प्रत्यासत्तित्वसिद्धिरिति वाच्यं॥ घटाभावज्ञानस्य चाक्षुषत्वासिद्धेः सन्निकर्षानिरूपणात्॥ न च विशेषणतैव प्रत्यासत्तिरिति वाच्यं॥
विशेषणतायाः सन्निकर्षसिध्यनंतरं तदधीनचाक्षुषत्वसिद्धिः तत्सिध्यनंतरं विशेषणतायाः प्रत्यासत्तित्वसिद्धिरित्यन्योन्या
श्रयप्रसंगात्॥ न चैवं चक्षुषा घटाभावं पश्यामीत्यनुभवविरोधः॥ त्वचा वायुं स्पृशामीतिवदुपपत्तेः॥ न चैवमिंद्रियव्यापा
रविरोधः॥ तस्याधिकरणग्रहोपक्षीणत्वात्॥ नापि करणांतरानुभवापत्तिः॥ त्वदभ्युपगतानुपलब्धेरेव करणत्वसंभवात्॥
न चैवं गौरवं अनुपलब्धेरसाधारणकारणत्वेन करणतायां गौरवाभावात्॥ प्रत्युत इंद्रियकरणत्वे विशेषणतापरिकल्प्य
तस्याः प्रत्यासत्तित्वज्ञानहेतुत्वयोः कल्पनायामेव गौरवात्॥ न चानुपलब्धेर्निर्व्यापारत्वेन कथं करणत्वमिति वाच्यं॥
गौरवेण व्यापारवत्त्वस्य करणलक्षणाप्रवेशात्॥ कालादिव्यावृत्त्यर्थं असाधारणकारणत्वस्यैव करणलक्षणतया
वाच्यत्वात्॥ तावताप्यतिशयोपपत्तेः॥ अन्यथा श्रोत्रस्य शब्दप्रागभावप्रत्यक्षकरणत्वं न स्यात्॥ तत्र व्यापारमात्रस्यैवा
भावात्॥ न च समवायसंबंधत्वेन विशेषणताभ्युपगंतव्येति वाच्यं॥ आवश्यकविशेषणतैव समवायहेतुकरूपादिविशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद

प्रमतीत्युपगतौ गौरवेण तत्कल्पनायोगात् ॥ अन्यथा वायौ समवायसत्वेन रूपप्रमा स्यात् ॥ न च समवायसत्वेपि रूपा धिक्का
भावान्न तत्प्रमेति वाच्यं ॥ वृत्तिनियामकसंबंधसत्वे रूपसाप्याप्यापाद्यत्वात् ॥ एवं घटादेरपि ज्ञानसमवायित्वापत्त्यात्मता
पत्तिः ॥ न च तन्निरूपितसमवायस्यैवात्र वृत्तिनियामकत्वात् नोक्तदोष इति वाच्यं ॥ स्वरूपवृत्त्यतिरेकेण तत्तन्निरूपितत्वस्य
अस्यतयानभ्युपगमेनोक्तदोषानतिवृत्तेः ॥ न च सिद्धांते इंद्रियेण शब्दादितादात्म्यग्रहे विशेषणताया इंद्रियप्रत्यासत्तित्व
मावश्यकमिति वाच्यं ॥ इंद्रियेण संयोगादीनां संबंधद्वयग्रहे तत्तादात्म्यस्य तदभिव्यंजकत्वेन साक्षिभास्यत्वाभ्युपगमेन विशेषण
तायाः प्रत्यासत्तित्वस्यानावश्यकत्वात् तस्माद्विशेषणतायाः प्रत्यासत्तित्वे न किंचित्प्रमाणं इत्यसन्निरूपणत्वेनानभेदप्र
माणं ॥ ५ ॥ ५ ॥ अपि च मनोसहकारियोग्यानुपलब्ध्यभावान्नेश्वरभेदे तत्प्रमाणं ॥ तथाहि ॥ तत्र योग्यस्यानुपलब्धिर्यो
॥४॥ ग्यानुपलब्धिः योग्या चासौ अनुपलब्धिर्वा ॥ नाद्यः ॥ तत्काले घटे मनस्त्वात्यंताभावस्य स्तंभेपि पिशाचान्योन्याभावस्याप्रत्यक्षत्वाप त्वा ॥४॥
त्तेः ॥ प्रतियोगिनोरयोग्यत्वात् ॥ प्रकृते ईश्वरभेदप्रत्यक्षं च न स्यात् ॥ ईश्वरस्य मनोयोग्यत्वाभावात् ॥ नांत्यः तत्राप्यनुपल
ब्धेर्योग्यत्वं नाम प्रतियोगित्वव्याप्येतरयावदुपलंभकसामग्रीकालिकत्वं किं वा प्रतियोगीसत्वप्रसंजनप्रसंजितप्रतियो

गिकत्वं वा ॥ नाद्यः ॥ संयोगिनाशक्षणीयसंयोगाभावप्रत्यक्षानापत्तेः ॥ तत्र प्रतियोग्युपलंभकसामग्रीमध्ये संयोगप्रत्यक्षस्या
पि प्रविष्टत्वेन तत्र तदभावात् ॥ परमाण्वाद्यभावस्य प्रत्यक्षत्वापत्त्या प्रतियोग्युपलंभकपदप्रतियोगिप्रत्यक्षसामग्रीपरत्वावश्यंभावेन
घटादौ मनस्त्वाद्यभावप्रत्यक्षानापत्तेः ॥ ईश्वरप्रत्यक्षाभावेन नाहमीश्वर इति भेदप्रत्यक्षानापत्तेः ॥ नांत्यः ॥ तत्रापि यत्र कुत्रचित् प्रति
योगिसत्वप्रसंजनप्रसंजितप्रतियोगिकानुपलंभो वा विवक्षितः अभावाधिकरणे तादृशो वा ॥ नाद्यः ॥ प्रतियोग्युपलंभसमयेपि
तादृशस्य सत्वेन अभावप्रत्यक्षापत्तेः ॥ न द्वितीयः ॥ अभावाधिकरणे तदापादनाभावेपि घटाद्यनुपलब्धिमात्रेण तदभावग्र
हस्यानुभवसिद्धत्वात् ॥ किंच प्रतियोगिसत्वप्रसंजनेन उपलब्ध्यापादनं ॥ अन्यापादनेनान्यापादनायोगात् ॥ न च प्रतियोगि
सत्वस्य उपलंभव्याप्यत्वात् तदापादनेन तदापादनं संभवतीति वाच्यं ॥ किं तत्र प्रतियोगिसत्वमात्रमुपलंभव्याप्यं प्रतियोगित्व
व्याप्येतरयावदुपलंभकसामग्रीसमहितं वा ॥ नाद्यः ॥ इतरसामग्रीविरहेपि अंधकारे घटादिसत्वे उपलंभाभावेन व्यभिचा
रात् ॥ न द्वितीयः ॥ तदुपलंभकसामग्र्या अदृष्टादेः कारणघटितत्वेनाभावदर्शिकार्यात्पूर्वं तदुन्नेयतत्समवधाननिश्चयाभावेन
तदवच्छिन्नप्रतियोगिसत्वापादनायोगेन तदुपलंभापादनायोगात् ॥ अभावग्रहणात्पूर्वं नियमेन तद्व्याप्यानुसंधानेमानाभावेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद०

तद्दापादनायोगाच्च ॥ अन्यथा घटाद्यभावस्य अनुपलंभलिंगेनानुमेयत्वापत्तेः प्रतियोगिसत्वोपलंभयोर्व्यतिरेकेयो व्याप्तिनिश्चयस्य धिक्कार
तस्माद्त्र नोपलभ्यते इति प्रतियोगिसत्वव्यापकोपलंभाभावे पक्षधर्मताज्ञानस्य व्यतिरेकरूपलिंगत्वात् ॥ न च प्रत्यक्षसामग्र्या बल
वत्वाद्भावप्रत्यक्षमेव जायत इति वाच्यं ॥ सन्निकर्षनिरूपणेन तदसिद्धेरुपपादितत्वात् ॥ सुखं साक्षात्करोमीत्यानुभववदीश्वरोभे
न दं साक्षात्करोमीत्यनुभवेन फलबलकल्प्य न प्रत्यक्षसामग्रीकल्पनायोगाच्च ॥ तस्मादेतदनुपलब्ध्येनाभावग्राहकत्वं ॥ ५ ॥ किं च अनु न
पलब्धेरनुपलब्धिः ॥ तत्रापि क्षत्रियादिसाधारणवेषे ब्राह्मणसंनिकृष्टादिसामग्रीसहिते ब्राह्मणत्वसत्वेप्ययं ब्राह्मणः इति तदभिव्यंजकोप
देशाभावात् तदनुपलंभवत् जीवेश्वराभेदसत्वेप्याचार्यवान्पुरुषो वेद श्रोतव्यो मंतव्य इत्यादि ब्रह्मस्वरूपाभिव्यंजकात्मोपदेशाभावात् एव
तदनुपलंभोपपत्तौ न तदापादनं युज्यते ॥ कृतोपदेशस्य तु तदभेदोपलंभोस्ति ॥ न तदापादनमपि ॥ न च जीवाभेदोपलंभवत् जीवेश्वराभेद ॥ ५ ॥
५५,५ सत्वे तदुपलंभः स्यादेव ॥ जीवनिष्ठाभेदत्वात् ॥ तत्र श्रोतृश्रुतीनामन्यपरत्वमिति वाच्यं ॥ तथात्वे जीवे अहं वेदात्माभेदस्याप्युपलब्धि
प्रसंगात् ॥ अदृष्टस्यातींद्रियत्वेन तद्भेदानुपलंभोपपादनेन चिदानंदादिस्वरूपस्येश्वरस्यातींद्रियत्वेन तद्भेदानुपलंभस्याप्यु
क पपत्तेः ॥ ननूपलंभस्यागंतुत्वे हि सहकार्यंतरापेक्षा ॥ सिद्धांते ॥ आत्मनः स्वप्रकाशतया तदुपलब्धौ न सहकार्यंतरापेक्षेति चेत्सत्यं ॥ न

थापि तमसा घटस्येव मायया आवृतत्वेन आत्मस्वरूपस्यानुपलंभेन तदुपलंभार्थं सहकार्यंतरस्यावश्यकत्वात् ॥ सच्चिदानंदात्मस्वरूपस्य
मायावृतत्वं ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीत्यादिश्रुत्या माययावृतज्ञानाः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥
इत्यादिगीतावचनाच्चावगम्यते ॥ किंच अदृष्टस्यातींद्रियत्वेन जीवे तद्भेदानुपलंभवत् ईश्वरस्यातींद्रियतयायोग्यत्वात् तद्भेदानु
पलंभोपपत्तौ न तदुपलंभापादनसंभवः ॥ तथाहि ईश्वरत्वं न तावज्जातिः ॥ एकव्यक्तौ तदभावात् ॥ न च लौकिकसाधारण्येनेश्वरत्वं जा मनुष्यादि
तिः ॥ लौकिकसाधारणेश्वरत्वस्य आगंतुकतया तस्य जातित्वायोगात् ॥ लौकिकेश्वराणां नाहमीश्वर इति भेदानुभवश्च न स्यात् ॥
अहमीश्वर इति तद्भेदस्यैव अनुभवः स्यात् ॥ निर्वक्तुमशक्यत्वात् ॥ न च द्व्यणुकादिकर्तृत्वं नित्यज्ञानाश्रयत्वं वेश्वरत्वमिति वाच्यं ॥ द्व्य
णुकस्य जीवानिष्ठनित्यताया ईश्वरज्ञाननित्यतायाश्चातींद्रियत्वेन तद्घटितेनेश्वरत्वस्य अयोग्यतया तद्भेदसत्वमात्रेण तदुपलंभापादनायो
गात् ॥ न च सर्वज्ञत्वं सर्वसाक्षात्कारवत्त्वं वा तदिति वाच्यं ॥ योगिष्वतिव्याप्तेः ॥ तस्मादीश्वरत्वस्य अतींद्रियत्वात्तद्भेद एव सत्वेपि न
तदुपलंभापादनमिति न योग्यानुपलब्धिसंभवः ॥ किंच जीवस्य विभुत्वमणुत्वं मध्यमपरिमाणवत्त्वं वांगीक्रियते ॥ आद्ये अह
मिहैवास्मीति प्रतीत्या आत्मनः परिच्छेदः प्रतीयते ॥ न च विभोरात्मनः परिच्छेदोस्ति इति परिच्छिन्नाहंकारप्रयुक्त एव स वाच्यः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३६० तथा चोपाधिकपरिच्छेदकस्यांतःकरणविशिष्टाहमर्थे प्रतीयमानेश्वरभेदस्याप्युपाधिकत्वेन स्फटिकलौहित्यादिवत् असत्यता धिकार
त्य प्रत्यक्षप्रमाणयोग्यता ॥ न चाहमिहैवास्मि इत्यत्रौपाधिकपरिच्छेदवदात्मप्रतीतावपि नाहमीश्वर इत्यत्र शुद्धात्मन्येव भेदः प्रतीय
त इति भेदस्य नासत्यत्वमिति वाच्यं ॥ अहमिति प्रतीतेरुभयत्र तुल्यत्वेन वैलक्षण्यायोगात् ॥ न चाणुत्वे नायं दोषः ॥ स्वतएव परिच्छि
न्नत्वादिति वाच्यं ॥ अणुत्वे व्यापिसुखाद्यनुपलब्धिप्रसंगात् ॥ गुणिनं विना गुणस्यान्यदेशे स्थितिसंयोगात् ॥ न चैवं घ्राणु
पलब्धे गुणिनं विना गंधस्य भायं विनिमयपर इति वाच्यं ॥ उक्तनियमबलेन तत्राप्यनुद्भूतरूपाणां पुष्पाद्यवयवानां कल्पनात् ॥
एकशरीरसंबंधिहस्तद्वयपादौ युगपच्चलनानुपपत्तेश्च ॥ तत्र प्रयत्नवदात्मसंयोगस्य असमवायीकारणस्य आत्मनोऽणुत्वे
एकस्मिन्नेकरे तत्सत्वेपि करांतरे तदभावेनाभावात् ॥ न च तर्हि मध्यमपरिमाणमस्तु तत्रोक्तदोषद्वयाभावादिति वाच्यं ॥ तथात्वे घ
टादिवत्सावयवत्वप्रसंगेन अनित्यत्वादिदोषप्रसंगात् ॥ तस्मादात्मनो विभुत्वस्यैव वाच्यतया तत्रोक्तरीत्या भेदस्यासत्यत्वसिद्धिः ॥ ६ ॥
ननु सुखादिधर्म्यहमर्थातिरेकेण जीवात्मसद्भावे मानाभावात् तस्य दुःखादिधर्म्यहमर्थस्येश्वराभेदसंभवाद्भेदस्य सत्यत्वसिद्धिः ॥

क देहतादात्म्यारोपोपाधिः श्वपरिच्छेद इति चेन्न ॥ दुःखादिसमसमानाकोहमर्थो नात्मा दृश्यत्वात् ॥ घटवदित्यनुमानेन पक्षधर्मता
बलात् अहंकारदृष्टत्वेन अहंकारदशानंतरं अथात आत्मादेश इति पृथगुपदेशेन जपं नाहंकाराद्भावगमात्तस्य
भाग चेश्वराभेदसंभवात् ॥ न च तथापि अहमिति प्रतीत्या आत्मनोऽभासमानत्वात् ॥ तथा च कथमात्मन्यहमर्थे परिच्छेदस्तद्बुद्धि त
त्व देष्योपाधिक इत्युक्तिरिति वाच्यं ॥ अहंप्रतीत्यविषयिणि अनात्मनि नियमेन अहं सुखी स्यामिति प्रतीत्या वा आत्मनोऽहंविष
द यत्वात् ॥ तथा चात्रौपाधिकपरिच्छेदवत्यात्मनि नाहमीश्वर इति प्रतीयमानभेदस्य असत्यतावश्यंभावः न च हेतोरप्रयोज
कत्वं ॥ अनात्मत्वे ज्ञानानाश्रयत्वस्यैव तंत्रत्वात् ॥ घटवदिति वाच्यं ॥ लाघवेन दृश्यत्वस्यैव अनात्मत्वप्रयोजकत्वात् ॥
तस्मादौपाधिकपरिच्छेदवत्यात्मनि प्रतीयमानेश्वराभेदस्य नसत्यत्वमिति न जीवेश्वरभेदे प्रत्यक्षं प्रमाणमिति सिद्धं ॥ ५
ननु जीवो ब्रह्मप्रतियोगिकभेदवान् ॥ यन्मयत्वात् असर्वज्ञत्वाद्वा घटवत् इत्यनेन भेदसिद्धिरिति चेन्न ॥ किं जीवशब्देन सुखादि
समससाकोहंपदार्थो विवक्षितः तदतिरिक्तोहंपदार्थो वा ॥ नाद्यः सिद्धसाधनत्वात् ॥ सिद्धांतेपि कल्पितसर्वभेदांगीकारात् ॥ न द्वितीयः
त्वन्मते असिद्धाश्रयासिद्धेः ॥ तथापि कल्पितसर्वभेदांगीकारेण सिद्धसाधनाच्च ॥ न स्वज्ञानाबाध्यभेदवत्वं साध्यं विवक्षितमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद

नसिद्धसाधनमितिवाच्यं॥ स्वशब्देनुक्तत्वादिविशिष्टस्यैवतन्न विवक्षायां ईश्वरभेदस्यअसत्यत्वस्य घटज्ञानाबाध्यत्ववत्॥ ज्ञाना धिक्कार
बाध्यत्वाभ्युपगमेनसिद्धसाधनतापत्तेः॥ केवलात्मविवक्षायां दृष्टांतेसाध्यासिध्याव्याप्यत्वासिद्धेः॥ निखिलभेदस्यापि केवलात्मज्ञा
नबाध्यत्वाभ्युपगमेनात्॥ अतएवपारमार्थिकेश्वरभेदवत्वंसाध्यमितिनिरस्तं॥ दृष्टांतेव्याप्यत्वासिद्धेः॥ नचनौपाधिकेश्वरभेदवत्त्वं क
साध्यं। तस्य दृष्टांतेपिसत्वात्साध्यव्याप्यत्वासिद्धेः॥ नवातस्यासत्यत्वं॥ तस्यसत्यत्वनियमादितिवाच्यं॥ कर्तृत्वादिविशिष्टधर्मिणितद्भेद
साधनेबाधात् सोपाधिकस्योक्तत्वात्॥ केवलात्मनितत्साधनेअनुपलब्धेर्हेतोरप्रयोजकत्वात्॥ ननुब्रह्मजीवप्रतियोगिकधर्मिज्ञानाबाध्यभेद
वत्पदार्थत्वादसंसारित्वाद्वा घटवदितिब्रह्मपक्षकानुमानेनभेदसाधनेनोक्तदोषावकाशः॥ त्वन्मतेब्रह्मणिताद्दृशभेदाभावेनसिद्ध
साधनत्वाभावात्॥ दृष्टांतेघटेजीवभेदस्यधर्मिरूपघटज्ञानाबाध्यत्वेन व्याप्यत्वासिध्यभावाच्चेतिचेन्न॥ तत्रकिंयत्किंचिद्धर्मिज्ञानाबा
ध्यभेदवत्त्वंसाध्यं विवक्षितं यावद्धर्मिज्ञानाबाध्यभेदवत्त्वंवा॥ नाद्यः॥ जीवस्यसर्वत्रैकत्वेनब्रह्मविशिष्टजीवस्य भेदस्यासत्वेस्मयत्किं
॥७॥ चित् घटलक्षण[redacted]धर्मिज्ञानाबाध्यत्वेनसिद्धसाधनात्॥ यावद्धर्मिमध्ये ब्रह्मप्रविष्टत्वेन घटनिष्ठजीवभेदस्यब्रह्मरूपधर्मिज्ञानाबा ॥७॥
ध्यत्वाभावेनव्याप्यत्वासिद्धेः॥ नचस्वज्ञानाबाध्यभेदवत्त्वंसाध्यं। एवंचस्वपदस्यसमभिव्याहृतपरतयानुमानेस्वशब्देनोक्तब्रह्मज्ञा

नाबाध्यजीवभेदस्यब्रह्मणित्वन्मतेनांगीकारात्॥ नचसिद्धसाधनं॥ नवादृष्टांतेव्याप्यत्वासिद्धिः॥ तत्रस्वशब्देनोक्तं घटज्ञानाबाध्यजीवभे
दस्यसत्वादितिवाच्यं॥ तत्रब्रह्मपदेनसगुणंब्रह्मविवक्षितं॥ अद्वैतंब्रह्मवा॥ नाद्यः॥ तादृशब्रह्मज्ञानाबाध्यत्वस्यासत्यजीवभेदेभ्युपगमेनसि
द्धसाधनान्निवृत्तेः॥ नांत्यः आश्रयासिद्धेः॥ नो च॥ धर्मिग्राहकाद्वैतश्रुतिप्रमाणेनजीवाभिन्नब्रह्मसिद्धेः॥ कुत्रवादृश्यजीवभेदसाधने
बाधापत्तेः॥ किंचोक्तानुमानद्वयेजडत्वमुपाधिरिति॥ घटादौसाध्यव्यापकत्वात् पक्षेसाधनाव्यापकत्वात्॥ नचजडत्वंनवार्थत्वं॥
तस्यपक्षेपिसत्वात्साधनव्यापकतेतिवाच्यं॥ अस्वप्रकाशस्यचेतनभिन्नत्वस्यवाजडत्वरूपत्वात्॥ जीवब्रह्मणोश्चात्रायंपुरुषः
स्वयंज्योतिरात्मैवज्योतिषांज्योतिरित्यादिश्रुत्याप्रत्यक्षनिराकरणोक्तयुक्त्याचात्मनःस्वप्रकाशत्वाच्चेतनत्वाच्च॥ तत्रजडत्वाभावेनसा
धनाव्यापकत्वात्॥ किंचोक्तहेतूनामप्रयोजकत्वं॥ विपक्षेबाधकतर्काभावात्॥ नचजीवेश्वरयोर्भेदाभावेन अखिललौकिकवैदि
कव्यवहारानुपपत्तेरेकबाधकेतिवाच्यं॥ कल्पितभेदमयापितदुपपत्तेः॥ तत्त्वमसीत्यादिवक्ष्यमाणाद्वैतश्रुतिविरोधाच्च॥ श्रीकृष्ण॥
तस्माज्जीवेश्वरभेदेनानुमानमपिप्रमाणं॥ ६॥ नापिजीवेश्वरभेदेद्वासुपर्णासयुजेतिप्रमाणं तस्याःश्रुतेर्भेदप्रतीतावपितत्रतात्पर्या
भावेनतदपत्तप्रामाण्याभावात्॥ अन्यथायजमानप्रस्तरइत्यादिश्रुतेरपितदभेदेप्रामाण्यापत्तिः॥ तात्पर्यज्ञानस्यशाब्दकारणत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भंगापत्तेश्च ॥ तात्पर्यं च श्रुतेः फलवत्यज्ञातेर्थे कल्पनीयं ॥ अन्यथा अनधिगतार्थगंतृत्वलक्षणप्रामाण्यभंगापत्तेः ॥ प्रयोजनप
वि र्यवसायाध्ययनविधिप्रापितत्वानुपपत्तेश्च ॥ न च ज्ञातेर्थे तात्पर्यमस्तु ॥ अनधिगतार्थगंतृत्वं च न प्रामाण्यमिति वाच्यं ॥ शाब्द
तात्पर्यार्थनिश्चये सति संशयाविपर्ययनिवृत्तिर्भवतीति तस्य तत्र तात्पर्यं कल्पनीयमिति वाच्यं मानांतरेणार्थनिश्चये सति ॥
तत्संशयादेर्निवृत्तौ शब्दस्य तात्पर्यं न कल्प्येत प्रयोजनाभावात् ॥ ननु अज्ञात एवार्थे श्रुतितात्पर्यं वाच्यं ॥ अन्यथार ध्नाजुहोतीत्या
दिहोमादावपि तात्पर्यापत्त्या विधेयत्वापातात् ॥ प्रकृते च जीवेश्वरभेदस्य प्रत्यक्षानुभवसिद्धत्वेन तत्संशयादिनिवृत्तेः ॥ न तत्तात्पर्य
पुं कल्पनायोगात् ॥ भेदश्रुतिरनुवादिका ॥ न च मानांतरसिद्धेर्थेपि वाक्यानां तात्पर्यं दृश्यत इति वाच्यं ॥ तत्र पुंवाक्यानां विवक्षयानु
रोधेन तात्पर्यसत्त्वेपि वेदे वक्तुरभावेन ज्ञातेर्थेन्यापरगम्यतात्पर्यकल्पनायोगात् ॥ न च प्रथममीश्वरभेदः श्रुत्यैव बोध्यते तदनंतरं
॥८॥ प्रत्यक्षेण बोध्यत इति भेदश्रुतेः ॥ स्मृतिमूलश्रुतेरिव अज्ञातार्थकत्वमिति वाच्यं ॥ भेदश्रुतिप्रतिसंधानविरहिणामपि नाहमीश्वर ॥८॥
इति भेदानुभवदर्शनेन प्रथमं श्रुत्या तद्बोधानाभावात् ॥ न च प्रथमेव श्रुतिप्रतिसंधानशालिनां तेषां परिचिनैरेव तद्बोधः श्रुति म

मानांतराज्ञातार्थकत्वमिति वाच्यं ॥ वाक्यार्थवाक्यार्थबोधस्य प्रत्यक्षानुमानसापेक्षपदपदार्थयुपमितिसापेक्षत्वेन विलंबितत्वाशी
घ्रप्रवृत्तिमत्प्रत्यक्षादेरेव भेदानुभवसंभवेन कापि भेदश्रुतेरज्ञातार्थकत्वाभावात् ॥ न च प्रत्यक्षसिद्धभेदस्य भेदएव श्रुत्या बोध्यत इति नो
त दोष इति वाच्यं ॥ एवं सत्यनुवादकवेदे सर्वत्र मानांतरसिद्धार्थातिरिक्तार्थकल्पनादनुवादकत्वभंगप्रसंगेन अतिरिक्तभेदस्यात्र बा
धितत्वात् ॥ प्रतियोगितावच्छेदकादिभेदाभावाच्च ॥ न च प्रत्यक्षेण भेदमात्रं बोध्यते तच्च तात्त्विकत्वमज्ञातं श्रुत्या बोध्यत इति वाच्यं ॥
श्रुतिप्रतिसंधानविरहिणामपि तात्त्विकत्वबुद्धेः संभवेन तस्याज्ञाततायोगात् ॥ न च तर्हि भेदस्य सत्यत्वं स्यादिति वाच्यं ॥ अनिदं
त्वमिति रजताद्याविदंतायाइवाधिष्ठानचैतन्यनिष्ठतात्त्विकत्वस्यैव तत्तादात्म्यापन्नभेदप्रतीयमानत्वेन तावता तस्य सत्यत्वासंभवात् ॥
न च श्रुतिबोधितार्थबाधकत्वेन स्मृतेरिव प्रत्यक्षस्य प्रामाण्यनिर्वाहार्थं तद्बाधितभेदइवाभेदश्रुतेस्तात्पर्यं कल्प्यत इति वाच्यं ॥ पौरुषे
यस्मृतिप्रामाण्यस्य श्रुत्यधीनत्वेन स्मृतस्यार्थे श्रुतेस्तात्पर्यकल्पनेपि श्रुतितिरिक्तत्वया स्वतस्त्वेनांगीकृतप्रत्यक्षप्रामाण्यस्य श्रुत्यधीनत्वा
भावेन तत्र तस्यास्तात्पर्यकल्पनायोगात् ॥ अन्यथा परस्पराहतवाक्यबाधकत्वेन प्रत्यक्षेपि न्यासो न स्यात् ॥ न च भेदस्य प्रत्यक्षवेद्यत्वेपि
नि सिद्धांतभ्रांतिपरंपराप्राप्तमिथ्यात्वबुद्धिनिवृत्त्यर्थं श्रुतेः स्वैरत्निरूपाज्ञातार्थकत्वं कल्प्यत इति वाच्यं ॥ मिथ्यात्वनिवृत्तेस्तात्त्विकरू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्तयात्वदभिमतप्रत्ययशादेवतात्विकत्वसिद्धेः॥ तस्मात्प्रत्यक्षबोधितार्थातिरिक्तार्थज्ञानार्थकत्वाभावात् भेदश्रुतेर्नैतत्तात्पर्यमिति न
प्रामाण्यं॥ किंत्वनुवादकत्वमेव निरवघपुरुषार्थाभावात्॥ पुरुषार्थस्य स्वर्गादेः कल्पितभेदेवाप्युपपत्तेः॥ नतत्राध्ययनविध्यु
पात्ताया श्रुतेस्तात्पर्यं॥ किंच॥ उदरमंतरं कुरुते अथ तस्य भयं भवति॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति श्रुत्या ईषद्
दज्ञानवतोपि भयमरणादिश्रवणेन भेदज्ञानस्यानर्थहेतुत्वाभ्युपगमात्॥ अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति
न स वेद यथा पशुरित्यादिश्रुत्या जीवेश्वरभेदज्ञानवतो ब्रह्मतत्वानवबोधे पशुसाम्यश्रवणेन भेदज्ञानस्य निंदितत्वाच्च॥ न भे
दश्रुतेस्तत्र तात्पर्यं॥ किंच नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोता इत्यादिश्रुत्या जीवपराभेदप्रतिसंधानात् भेदश्रुतेः कल्पितभेद
विषयत्वं॥ न च भेदश्रुत्या अभेदश्रुतेरेव कल्पितभेदविषयत्वमस्त्विति वाच्यं॥ नाहमीश्वर इति भेदप्रत्यक्षविरोधेन तादृरूककल्पि
ताभेदायोगात्॥ पूर्वोक्तरीत्या भेदश्रुतेर्भेदतात्पर्याभावेन मानांतराज्ञातफलवदभेदप्रतिपादकश्रुतेरकविज्ञातौ उपक्रमादि
॥९॥ भिरभेदतात्पर्यावगमेनभावे न भेदश्रुत्या तादृशाभेदश्रुतेर्बाधायोगाच्च॥ श्रुत्यैकवेद्याभेदस्य कल्पितत्वेन श्रुतेरप्रामाण्या ॥९॥
योगाच्च॥ न चैवं भेदश्रुतेरप्येवं स्यादिति वाच्यं॥ तात्पर्यविषयाद्वैतब्रह्मस्वरूपाबाधेनातथात्वात्॥ न च केनाप्यंगीकारेण

तस्याप्रसक्तत्वात्॥ न च पुराणेन सृष्टिस्थितिलयकर्तृत्वेनाक्षिप्यादिकं नानाकर्तृकं विचित्रकार्यत्वात् प्रासादादिवदित्यनुमानेनेश्वना
नात्वप्रसक्तो न निषेधः क्रियत इति वाच्यं॥ दृष्टसामान्येनैव तत्सामान्यनिषेधश्रवणे न संकोचायोगात्॥ अन्यथा श्रुतिबाधा
पत्तेः अतो द्वा सुपर्णेत्यादिश्रुतिः न भेदे प्रमाणं॥ वस्तुतस्तु नेयं श्रुतिर्जीवेश्वरभेदं प्रतिपादयति॥ येन भेदस्य सत्यत्वं स्यात्॥ किंतु जी
वस्य निष्कृष्टाहंकारचैतन्यस्वरूपमेव प्रतिपादयति॥ तथाहि॥ द्विशब्दाद्वित्वप्रतीत्या जीवेश्वरभेदः प्रतीयते किंवा पिप्पलं
स्वाद्वत्यनश्नन्नन्य इत्यत्र कर्मफलभोक्तृत्वाभोक्तृत्वलिंगद्वयेन तद्भेदः प्रतीयते॥ नाद्यः द्विशब्देन अंतःकरणजीवयोरे
वद्वित्वप्रतिपादनात्॥ नांत्यः॥ तत्राप्यंतःकरणजीवयोरेव भोक्तृत्वाभोक्तृत्वप्रतिपादनात्॥ न चांतःकरणस्य
जडत्वात्कथं भोक्तृत्वं अहं भोक्तेति प्रत्यभिज्ञाविरोधेन समानं वृक्षं परिषस्वजातेति जीवस्य देहावच्छिन्नचेतन
श्रवणेन च तस्य जीवस्य कथमभोक्तृत्वमिति वाच्यं॥ विचारादात्मापि अंतःकरणस्य भोक्तृत्वप्रतिपादनेन वस्तुतो जी
वस्याभोक्तृप्रतिपादनेन चोक्तदोषाभावात्॥ न च निष्कृष्टाहं चैतन्यस्वरूपाभावात् जीवस्याभोक्तृत्वप्रतिपादनेन
चोहनीयं॥ न त्वंतःकरणस्य भोक्तृत्वं व्यर्थत्वात् इति वाच्यं॥ जीवस्य भोक्तृत्वमानप्रतिपादनेहं भोक्तेति भोक्तृत्वानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवविरोधः स्यात्॥ अतस्तर्हि श्रीधरविद्यारण्यमतानुरोधेनानन्दोक्तत्वं अंतःकरणनिष्ठं॥ ननु वस्तुतो जीवनिष्ठमिति प्रतिपा
दनार्थत्वात्॥ न च गुहाधिकरणन्यायेन जीवेश्वरपरत्वमेव वाच्यं॥ किंचास्मिन्पक्षे अशब्दस्यांतःकरणस्याचित्वा
दात्मत्यापत्तेरंतःकरणपरत्वं कल्पनीयं॥ इति गौरवमिति निर्वाच्यं॥ अन्यत्र स्पष्टं पैंगिरहस्यब्राह्मणे तयोरन्यः पिप्पलं स्वा
द्वत्ति सत्वं अनश्नन्नन्यो अभिपश्यतीति क्षेत्रज्ञ इति॥ कर्मफलभोक्तृत्वात् सत्वपदवाच्यांतःकरणरूपः अभोक्ता क्षेत्र
ज्ञपदवाच्यः जीवरूप इति व्याख्यातत्वात्॥ न च गौरवदोषः। गुहाधिकरणे चैवं बाधकाभावात् तत्र युक्तं जीवेश्व
रत्वं ननु सत्वशब्दस्य जीवेभिधानकोशे वन्यान्निर्नेष्यन्ति निरुष्टसत्वामिति काव्यादौ च प्रयोगदर्शनात् सत्व
शब्दो जीवपरः एवं क्षेत्रज्ञशब्दोपि परमात्मपर एव योस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षत इति मानववचनात्॥ क्षेत्र
ज्ञं चापि मां विद्धि इति गीतावचनात्॥ नत्वंतःकरणजीवपरौ तौ पूर्वोक्तदोषानतिवर्तेते इति चेन्न॥ तत्रैव पैंगिरहस्य
१०॥ ब्राह्मणे येन स्वप्नं पश्यतीति तत्सत्वं॥ एष शारीर उपद्रष्टा न क्षेत्र इति सत्वशब्दस्य स्पष्टदर्शनकरणांतःकरणपरत्वेन ॥१०
क्षेत्रज्ञपदस्य शारीरजीवपरत्वेन व्याख्यातत्वात् नत्वत्र सत्वक्षेत्रज्ञपदयोरंतःकरणजीवपरत्वावगमात् निषं

टादावंतःकरणकवलितजीवस्यैव पदार्थत्वात्॥ सत्वशब्दो न विरुद्धः॥ एवं मानववचनादौ परमात्मसमानाधिकरण्येन क्षे
त्रज्ञशब्दप्रयोगः॥ न परमात्मवाचकत्वेन किंतु क्षेत्रज्ञशब्दवाच्यजीवस्य तदभेदाभिप्रायेणेति नोक्तदोषः॥ किंचास्य मंत्रस्यो
पक्रमे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपसंहारे ब्रह्म वेद ब्रह्मैव भवतीति ब्रह्मज्ञानिनो जीवस्य ब्रह्माभेदावधिगमेन
जीवेश्वरभेदपरत्वायोगात्॥ यः सर्वज्ञः सर्ववित् इत्यादिना परमात्मानमुपक्रम्य यत्र नाड्यः संचरंति बहुधा जायमान इत्या
दिना जीवाभेदमुक्त्वा कथं ब्रह्मणः भोक्[illegible] विशिष्टजीवाभेद इत्याकांक्षायां भोक्तृत्वादिकवलितांतःकरणनिष्ठं न तु जीव
निष्ठं॥ तस्य निष्कलंकस्वैतन्यत्वात्॥ तथा च तादृशजीवस्वरूपब्रह्मण उपपद्यत इति प्रदर्शनार्थत्वेन अस्य मंत्रस्य भेद
परत्वं संयुक्तं॥ तस्मान्नेयं श्रुतिः भेदपरा॥ ननु ब्रह्मविदाप्नोति परमिति ब्रह्मविद्रूपेणाप्राप्तप्राप्त्यभावे न भेदावगमादि
व यं श्रुतिरभेदप्रमाणमिति चेन्न॥ न वाप्राप्यप्राप्त्यभावः तयोर्व्य[illegible]तु ब्रह्मणस्तत्प्राप्तिलक्षणा मुक्तिरेवोच्यते॥
बृहदारण्यकेन यदाह॥ असतो मा सद्गमयेति मृत्युर्वा असत् सदमृतं मृत्योर्मामृतं गमय अमृतं मा कुर्वित्येवैतदाहेति
सच्छब्देन्दिकाः मृतादास्यार्थश्रुतेरमृताभेदाभिव्यक्त्यर्थतया व्याख्यातत्वेन मुक्तिफलप्रतिपादकेषु ब्रह्मावाप्तिश्रवणानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौर स

तद्भावापत्तिपरत्वावगमात् ॥ किंच ब्रह्म ब्रह्मविदोः ब्रह्मप्राप्तिर्न ज्ञानाभिव्यक्तिव्यतिरेकेण निर्वक्तुमशक्यते ॥ तथा भिक्कार
हि ॥ न तावद्ब्रह्मविद्ब्रह्म[illegible]रयोः सामीप्यादिः संबंधादिः प्राप्तिरभिधीयते नाप्यन्यन्नामरूपेत द्वाविद्वान्नामरूपाद्विमुक्तः इत्या
दिश्रुत्या अविभागो वचनादिति सूत्रेण न ब्रह्मविदो वागादिनामतानां स्वरूपेण लक्षणं यस्यापि तत्वेन शरीरासंभवा
त् ॥ यथा पुष्करपलाश इति श्रुत्या तदधिगम इति सूत्रेण च ब्रह्मविदः पुण्याद्यसंबंधस्य प्रदर्शितत्वेन तदधीनशरीरा
संभवात् ॥ एवं ब्रह्मणोपि सशरीरमशरीरं वाव संतमिति शरीरनिषेधात् ॥ रमणीयचरणा इत्यादिश्रुत्या गम इति सूत्रे
ण च ब्रह्मविदः पुण्याद्यसंबंधशरीरमात्रस्य कर्माधीनत्वश्रवणेन तद्रहितस्य ब्रह्मणः संभवात् ॥ नापि ब्रह्मविद्ब्रह्म
णोः संबंधः प्राप्तिः तयोः समवायतादात्म्ययोरसंभवात् ॥ विभुनिरवयवयोः क्रियाधीनसंयोगाभावात् ॥ संयोगांगीका ॥२२॥
॥२२॥ रेपि तस्य पूर्वमपि सत्वेन ब्रह्मत्वेन फलत्वाभावात् ॥ तस्माद् इसं तेषु ब्रह्मप्राप्तिश्रवणानां भेदघटितप्राप्त्यर्थकत्वासं
भवात् भेदाभिव्यक्तेरेव तदर्थो वाच्यः अत एव ब्रह्म वेद ब्रह्मैव भवतीति ब्रह्मविदः ब्रह्मभावापत्तिः श्रूयते ॥ न च तत्रा
प्येवशब्दः इवार्थकः ॥ निघंटादौ पर्यायेण प्रयोगदर्शनात् ॥ अत एव निरंजनः परमं साम्यमुपैतीति श्रुति ब्रह्मविदः ब्र

२

ह्मसादृश्यं प्राप्नोतीति वाच्यं ॥ तथाप्येवशब्दस्यावधारणे निरूढत्वेन अन्यार्थस्वीकारे मानाभावात् ॥ साम्यश्रुतेर
प्यभेद एवार्थः ॥ परमसाम्यस्याभेदं विनानुपपत्तेः किंच साम्यमित्यत्र शरीरसाम्यमात्मसाम्यं वा विवक्षितं ॥ नाद्यः ॥
शरीरनिरासे नैवतस्यापि निरासत्वात् ॥ नांत्यः ॥ व्याप्ययोरवयववत्क्रियासाम्ययोगात् ॥ नापि गुणसाम्यं ॥ तस्य जन्यत्वे
नित्यत्वं वा ॥ नाद्यः ॥ जन्यभावस्यानित्यत्वनियमेन मुक्तस्य संसारित्वप्रसंगात् ॥ नांत्यः ॥ तस्य प्रागपि सत्वे ब्रह्म वेदनसा
फल्यायोगात् ॥ किंच यत्किंचित्साम्यं यावत्साम्यं वा ॥ नाद्यः ॥ अतिप्रसंगात् ॥ अंत्ये जले[illegible] जगत्कारणत्वादि
धर्माभावेन तदसंभवात् ॥ तस्माद् उदाहृतशास्त्रेषु सत्व ब्रह्मप्राप्तिश्रवणानां अभेदाभिव्यक्त्यर्थकमेव युक्तमि
ति न भेदकापि श्रुतिः प्रमाणं ॥ ननु तथापि सोश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चितेति इत्यत्र सहयोगतृतीया
न ब्रह्म ब्रह्मविदोर्भेदावगमात् श्रुतिः प्रमाणमिति चेन्न ॥ सहार्थे तृतीयायां ब्रह्मणः भोगसाहित्ये भो
क्तृत्वसाहित्ये वा विवक्षिते भोग्यापेक्षया वा प्राप्तत्वपेक्षया वा ब्रह्मणा अप्राधान्यप्रसंगेन निरतिशयपुरुषार्थत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भे०२० धि०

स्यनिरतिशयेश्वरस्य वाहानिप्रसंगात् ॥ सहायुक्तेऽप्रधानइतिस्मरणात् ॥ सहार्थे तृतीयायाः सर्वान्कामान्सम
श्रुत इत्यनन्वयस्य वक्तव्यत्वेन सोऽश्नुते सर्वान्कामान्सहेत्यध्ययनसंप्रदायप्राप्तवाक्यविच्छेदाननुगुणत्वाच्च ॥
अतोन सहायोगे तृतीया ॥ किं त्वित्थंभावे ॥ तथा च ब्रह्मरूपेण ब्रह्मवित् ॥ सर्वान्कामान्सहयुगपदश्नुते । अनुभ
वतीत्यर्थः ॥ नच त्वन्मते मुक्तौ सर्वान्कामान्सह समश्नुत इत्यनुपपन्नं ब्रह्मसुखस्यैकस्यानुभवादिति वाच्यं ॥ न
हि कामशब्दः संकल्पनादिविषयवाची ॥ मुक्तौ तदभावात् ॥ किंतु तत्संबंधाभिव्यंग्यसुखवाची ॥ तेषामेव निरूपा
धिककामनाविषयत्वात् ॥ ततश्चैव त्रैकालिकानि सर्वजीवानुभव्यानि सर्वाण्यपि सुखानि ॥ एतस्यैवानंदस्यान्या
नि भूतानि मात्रामुपजीवंतीति श्रुतेः ब्रह्मानंदसंदोहबिंदुलेशा इति ब्रह्मस्वरूपेण स्वाभिन्नमपि आनंदमनुभवेत
॥१२॥ सर्वाण्यपि सुखान्यनुभूयंतीत्येवं स्वार्थपरत्वे नो कश्चिद्दोषात् ॥ तथा चोक्तं ब्रह्मगीतायां ॥ सोऽश्नुते सर्वान्कामान्क्रमेण ॥१२॥
च सुरर्षभाः ॥ विदितब्रह्मरूपेण जीवन्मुक्तो न संशयः ॥ अतो नेयं श्रुतिरपि जीवेश्वरभेदे प्रमाणं ॥ न ह्यात्मावा
अरे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिर्द्रष्टृद्रष्टव्यभावबोधिका तत्र प्रमाणं ॥ कल्पितभेदेनापि द्रष्टृद्रष्टव्यभावोपपत्तेः

एवं यदियाः काश्चन भेदश्रुतयः संति तासां सर्वासामपि कल्पितभेदविषयत्वमेव प्रागुक्तरीत्या तात्पर्याभावात् ॥ अ
प्रामाण्याभावाच्चेति सिद्धं ॥ ननु श्रुतिर्भेदे प्रमाणमिति नाप्यर्थापत्तिस्तत्र प्रमाणमिति ॥ सत्यभेदं विना अनुपपन्नार्था
भावात् ॥ कल्पितभेदे नापि लौकिकवैदिकसर्वव्यवहारोपपत्तेः ॥ प्रस्तुतजीवभेदे एवेश्वरस्यात्मत्वानुपपत्तिः ॥ त
थाहि ॥ तत्किमात्मत्वं ॥ अहमनुभवगोचरत्वं ॥ उत ज्ञानाश्रयत्वं ॥ जातिर्वा ॥ नाद्यः ॥ मनोऽयोग्यस्य अहमनु
भवे कदाचिदप्यप्रकाशमानस्यात्मत्वासिद्धेः ॥ दुःखसुखादेरपि अनात्मत्वापत्तेश्च ॥ न द्वितीयः ॥ अहमनुभवगोचरस्य
घटादिवज्ज्ञानाश्रयत्वानुपपत्तेः ॥ लाघवेन ज्ञानस्यैवात्मत्वेन तदाश्रयस्यात्मतायोगाच्च ॥ नांत्यः ॥ अहमनुभवगोचरस्य
घटादिवत्तद्योगात् ॥ मानाभावाच्च ॥ न चात्मपदप्रवृत्तिनिमित्तत्वेन तत्सिद्धिः वाधाभावादिति वाच्यं ॥ विभुत्वेना
काशादिवत्तत्र तद्योगात् ॥ समवायनिराकरणेन तत्र तत्सिद्धेश्च ॥ अतो न जीवेश्वरभेदसिद्धिः ॥ ननु एवमपि कं
थं तद्भेदासिद्धिरिति चेन्न ॥ तद्भेदस्याप्रामाणिकत्वात् एवं तद्भेदासिद्धेः ॥ न स्वत्वमपि अद्वैतश्रुतेश्च तत्सिद्धेश्च ॥ किं
चांतःकरणादिरिक्तकर्तृत्वादिधर्मैर्जीवात्मसंसारी तादात्म्याभिन्नस्तद्रहितो वाचेश्वरता कूटस्थवदित्यनुमानेनापि तद्भे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेदे

दसिद्धेः॥ नचाप्रयोजकत्वं॥ अद्वैतप्रामाण्यप्रसंगात्॥ भेदेप्रामाण्यनिरूपणप्रसंगात्॥ ईश्वरस्यानात्मत्वेनेष्टेश्च॥ धिक्कार
अतोजीवेश्वरयोरभेद एव॥ ननु भेद इति सिद्धं॥ ननु जीवानां परस्परं भिन्नत्वाद्भेदः कथमीश्वरस्येति चेन्न॥ परस्परं
भेदे प्रमाणाभावात्॥ नन्वनुमानमेव प्रमाणं॥ तथाहि॥ देवदत्तात्मा यज्ञदत्तात्मप्रतियोगिकस्वज्ञानाबाध्यभेदवान्
तद्गतसुखादेः स्वगतत्वेनानुसंधानशून्यत्वात्॥ घटवत्॥ पक्षेचात्मविशेषणं देवदत्तपदं वाच्यं शरीरादौ सिद्धि
साधनवारणाय देवदत्तपदं॥ यज्ञदत्तात्मनो असिद्धबाधवारणाय साध्ये स्वज्ञानाबाध्यत्वविशेषणं॥ कल्पितभेदमा
दायसिद्धसाधनवारणाय हेतौ स्वगतत्वविशेषणं॥ परोक्षवदीयदुःखादिप्रयुक्तौ सिद्धिवारणार्थमिति चेन्न॥ विपक्षे
बाधकाभावेन अप्रयोजकत्वात्॥ नच यज्ञदत्तात्मवत्पक्षे हेत्वभावप्रसंग एव बाधक इति वाच्यं॥ जीवनिष्ठा सर्वज्ञ
स्यौपाधिकभेदमादाय हेतोरुपपत्तेः॥ ननु उभयत्र भेदस्य किं नामौपाधिकत्वं॥ न तावदुपाधिजन्यत्वं॥ भेद
॥१२॥ स्यानित्यत्वेन तद्योगात्॥ नापि ज्ञानाप्रमाणत्वं॥ ज्ञानस्य प्रमात्वविवक्षायां तद्विषयभेदस्य सत्यत्वसिद्धेः॥ भ्रमत्वे ॥१२॥
चपक्षेहेत्वासिद्धेः॥ उपाधिभेदमात्रस्य हेतुकुंडलभेदप्रयोजकत्वात् इति चेन्न॥ दर्पणप्रयुक्तबिंबप्रतिबिंबभाववत्

उपाधिरागंक्त्वेन तत्प्रयुक्तभेदस्यापि तन्नाशे उपाधेरनादित्वे तद्भेदस्याप्यनादित्वेन चोक्तदोषाभावात्॥ परमतेप्राग
भावस्य सामग्र्यभावाधीनत्ववदनादिभेदस्योपाधिस्थितिसाधीनस्थितिकत्वेन तन्नाशाधीननाशप्रतियोगित्वेन वा त
दधीनत्वोपपत्तेश्च॥ नचौपाधिकभेदसद्भावेन प्रमाणमस्तीति वाच्यं॥ किमन्यत्रैवमुच्यते॥ जीवेश्वरयोर्जीवानां वा
नाम्नः॥ सूक्ष्मस्थूलघटभेदेन तदवच्छिन्नाकाशयोरपि द्वित्वमिति स्वरूपतो भेदानुभवेन विशति पदार्थान्तरस्य
त्वरूपकार्यस्यदर्शनेन च भेदस्यावश्यकत्वात्॥ किंच कर्णावच्छिन्नाकाशश्रोतदनवच्छिन्नाकाशभेद औपाधिक आवश्यकः॥
अन्यथानभोमात्रस्यश्रोत्रत्वापत्तौ सर्वशब्दोपलब्धिप्रसंगात्॥ कर्णसंमितसंयोगस्य विषयसंबंधस्य वा तदुपलब्धिनिमि
त्तकत्वकल्पनान्नोक्तदोष इति वाच्यं॥ चाक्षुषप्रत्यक्षादौ चक्षुर्गोलकतदन्यसंबंधस्य हेतुत्वादर्शनेन अत्र तथाकल्पनायोगात्
श्रोत्रगोलके अनंतवायुशब्दसंबंधतन्निमित्तकत्वकल्पनायां गौरवाच्च॥ एवंच सावयवापि तत्कल्पने कर्णवलयावच्छिन्नस्य त्वं
श्रोत्रत्वनियामकत्वानुपपत्तेश्च॥ ततएवातिप्रसंगभंगात्॥ एवंच क्षादावपि अग्रत्वादिभेदेन भेदो वाच्यः॥ अन्यथा संयोगतदभाव
योरेकस्मिन्नधिकरणे विरोधेन सामानाधिकरण्यासंभवात्॥ नचाग्रत्वाद्यवच्छेदकभेदेन प्रतियोगितदभावयोरेकस्मि
न्नधिकरणेन विरोध इति वाच्यं॥ अग्रमूलयोर्भेदाभावे अग्रत्वस्य संयोगाभाववत्त्वस्य च निरूपित्वे न तदभाववद्वृत्तित्वरूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदेपि वच्छेदकस्यैवसंभवात्॥ तस्मादेकात्मे नाप्याकाशादौ वौपाधिकभेदोंगीकर्तव्यः॥ नूच नत्वेत्र भेदो वास्तव एवास्तु किं नौपा कार
धिके नेति वाच्यं॥ अबाधिकभेदप्रत्यभिज्ञाने नतस्यैव वाच्यत्वात्॥ न द्वितीयः॥ प्रत्यभिज्ञाने ताक्करणे जीवोपाधिकेश्च रभेदस्यौपा
धित्वात्॥ अत एव नांतः॥ जीवा नामपि नाहं यज्ञदत्त इति प्रतिविच्छिन्नात्मन्येव भेदस्य प्रतीयमानत्वेन तस्यौपाधिकत्वावश्यंभावा
च्च॥ यथाह्ययं ज्योतिरात्मा विवस्वानपोभिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा एवं
एवाभिभूतोत्माभूतेभूते व्यवस्थितः॥ इत्यादिश्रुतेभ्यः॥ आकाशमेकं हि यथा घटादिषु पृथग्भवेत्॥ तथात्मैकोप्यनेकः स्या
ज्जलाधारेष्विवांशुमानित्यादिस्मृतेभ्यश्च॥ तस्मादौपाधिकभेदे नैव व्यवस्थोपपत्तौ उक्तहेतुरप्रयोजकः॥ किंच जीवैक्येपि तु
यज्ञदत्तदेवदत्तादिशरीरभेदाननुसंधानादिव्यवस्थोपपत्तिः॥ न च शरीरभेदमात्रेण दुःखाद्यननुसंधाने बालशरीराभेदेन
॥१४॥ पृथक् शरीरस्य तच्छरीरिणः पूर्वदुःखाद्यननुसंधानप्रसंगादिति वाच्यं॥ तत्र शरीरभेदस्यैवासिद्धेः मानाभावात्॥ न च ॥१४॥
बदरामलकवत् परिणामभेदेऽप्येकत्वमानमिति वाच्यं॥ शरीरहस्तपादाद्यवच्छेदेन वृक्षकाम्मूलाग्रावच्छेदेनैवेति॥ संकुचितपटादौ
तदवस्थानभेदेन स्थूलसूक्ष्मपरिमाणभेदे सत्यपि तद्भेदाभावेन व्यभिचारात्॥ वस्तुतस्तु॥ येन मनसा यदनुभूयते तेनैव तत
स्य स्मरणमिति नियमेन बालवृद्धशरीरावच्छिन्नात्मगतसुखाद्यनुभववतः करणस्यैकत्वेन न तत्र तद्भेदाभावेन तस्य तदनु

त संधानोपपत्तेः॥ अत एव कायव्यूहं घनवतो योगिनः तच्छरीरावच्छिन्नात्मगतसुखाद्यनुसंधानं न स्यात् शरीरभेदादिति प्रत्युक्तं॥
नानाशरीरावच्छिन्नसुखाद्यनुभववतः [illegible]णस्यैकत्वेन न तत्र तद्भेदाभावात्॥ एवं च प्रकृते जीवैक्येपि तत्तदंतःकरणभेदस्य
सत्त्वात् न तदनुसंधानोपपत्तिरिति न कश्चिद्दोषः॥ किंच तदौपाधिकभेदानंगीकारेपि देवदत्तस्य यज्ञदत्तीयसुखाद्यननुसंधाना
र्थं भेदो नावश्यकः॥ तत्तच्छरीरावच्छिन्नांतःकरणस्य तत्तच्छरीरावच्छिन्नात्मगतसुखाद्यनुभवकत्वनियमेन देवदत्तांतःक सन्निकर्ष
रणस्य यज्ञदत्तशरीरावच्छिन्नात्मगतसुखाद्यनुभवकत्वाभावेन भेदं विनाप्यननुसंधानोपपत्तेः॥ अन्यथा त्वन्मतेपि
देवदत्तस्य यज्ञदत्तीयसुखाद्यननुसंधानप्रसंगः॥ यज्ञदत्तात्मनि यज्ञदत्तशरीरावच्छिन्नात्मवत् देवदत्तशरीरावच्छिन्नत्वस्या
पि सत्त्वात्॥ जीवविभुत्वस्य त्वयापि स्वीकारात्॥ न च यददृष्टारब्धं यच्छरीरं तच्छरीरावच्छेदेन तददृष्टारब्धसुखाद्यनुभवः॥
एवं च देवदत्तशरीरस्य यज्ञदत्तादृष्टजन्यत्वाभावेन तच्छरीरावच्छेदेन तत्सुखाद्यनुभवप्रसंग इति वाच्यं॥ तथा सति यज्ञ मात्रा
दत्तपुत्रादेर्यज्ञदत्तीयसुखानुभवो दुर्वारः॥ तच्छरीरस्य तददृष्टारब्धत्वात्॥ न च तददृष्टारब्धत्वं नियामकमिति नोक्तदोष इ
ति वाच्यं॥ कुत्रापि तदसंभवात्॥ तथा च गत्यंतराभावात् प्रागुक्तनियम एवांगीकर्तव्यः॥ एवं चावश्यकत्वात् तन्नियमेनैव अनुसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यानानुसंधानव्यवस्थोपपत्तेः॥ न निष्प्रयोजनाप्रामाणिकगौरवयुक्तभेदकल्पनं युक्तमिति जीवानामपि परस्परं न भेद
इति सिद्धं॥ ननु जीवानां परस्परं भेदाभावेपि अभेदे किं मानमिति चेन्न॥ भेदस्याप्रामाणिकत्वेन तत एवतत्सिद्धेः॥ एकत्वेहि
भूतात्मेत्यादिश्रुत्यावा तत्सिद्धेः॥ किंच ध्वंसाप्रतियोगिदेवदत्ताहमनुभवविशेष्यः देहाद्यतिरिक्तः यज्ञदत्ताहमनुभवविशेष्यप्र
तियोगिकः अनौपाधिकभेदाभाववान् तदवच्छिन्नस्थूलसूक्ष्मादिशरीरादिव्यतिरिक्तत्वे सत्यहमनुभवविशेष्यत्वात्॥ चेतनत्वा
द्यज्ञदत्तवदित्यनुमानेनापि भेदासिद्धिः॥ अत्र पक्षे ध्वंसाप्रतियोगीति साध्यविशेषणं॥ देहादेरप्यहमनुभवविशेष्यत्वात्॥ तत्र
बाधवारणाय देवदत्तपदं॥ यज्ञदत्ताहमनुभवविशेष्येकदाप्यात्मनि सिद्धसाधनवारणाय अहमनुभवेतिपदं॥ घटत्वादौ बाध
वारणाय ध्वंसाप्रतियोगीति देवदत्ताहमनुभवविषयइत्युक्ते अहंत्वस्यापि तद्विषयत्वेन तत्र बाधः स्यात्तद्वारणाय विशेष्येति
विशेषणं॥ देवदत्तात्मनि यज्ञदत्ताहमनुभवविशेष्यनिरूपितदेहेंद्रियादिप्रतियोगिकभेदस्वीकारेण तदभावसाधने बाधः स्यात्त
१५॥ द्वारणाय साध्ये देहेंद्रियव्यतिरिक्तत्वे सतीति विशेषणं॥ यज्ञदत्तविशेषणं देवदत्तात्मनि तदीयात्मप्रतियोगिकनिरूपाधिकभे ॥१५॥
म दाभावस्य पक्षेते प्यंगीकारात् तत्सिद्धवारणाय यज्ञदत्तानुभवविशेष्येत्यादि प्रतियोगिकभेदस्य पक्षेपि सत्त्वे न तदभावसाधने
बाधः स्यात्तद्वारणायाहमनुभवेति विशेषणं॥ अहमनुभवविषये सुके आत्मत्वस्यापि तद्विषयत्वेन तत्प्रतियोगिकभेदाभाव

साधने बाधः स्यात्तद्वारणाय विशेष्येति विशेषणं॥ अनौपाधिकेति विशेषणं देवदत्तात्मनि यज्ञदत्तात्मप्रतियोगिकौपाधिकभेदस्य
स्वीकारात्तत्राधित्यसाधने बाधः स्यात्तद्वारणाय देहेंद्रियादेरप्यहमनुभवविशेष्यत्वात्॥ तत्रोक्तसाध्याभावेन व्यभिचारः॥ अतस्त
द्वारणाय तद्व्यतिरिक्तत्वाविशेषणं॥ हेतौ तद्व्यतिरिक्तत्वे सति विशेष्यत्वादित्युक्ते घटादौ व्यभिचारस्तद्वारणाय अहमनुभवेति
विशेषणं॥ तावत्युक्ते आत्मत्वस्यापि तद्विषयत्वे न तत्र व्यभिचारः स्यात्॥ तद्वारणाय विशेष्यत्वादिति॥ तस्मात् भेदे प्रमाणाद्भे
दस्याप्रामाणिकत्वात् जीवब्रह्मणोरभेदएव न तु भेदः॥ किंच त्वन्मते भेदोनाम विभागः पृथक्त्वं॥ वैलक्षण्यमन्योन्याभावस्वरूपं वा
स्य नाद्यः॥ विभागस्य संयोगपूर्वकत्वे विभागात्तदभावेन तदभावात् परस्परमभेदापत्तेः॥ विभागस्य गुणत्वे न भेदत्वानुपपत्तेश्च॥ अतो
व न द्वितीयः॥ किं चात्रोभयत्र प्रत्यक्षं प्रमाणमन्यद्वा॥ नाद्यः॥ उभयोरपि धर्मिद्वयप्रत्यक्षाधीनप्रत्यक्षत्वेन ईश्वरस्याप्रत्यक्षतयातद
भावात्॥ नांत्यः॥ तस्यानिरस्तत्वात्॥ नापि तृतीयः॥ तत्र किं वैलक्षण्यं विविधलक्षणत्वं विरुद्धधर्मवत्त्वं वा॥ नाद्यः॥ एकस्य घटस्यापि
भेदप्रसंगात्॥ कंबुग्रीवादिविलक्षणाश्रयत्वात्॥ नांत्यः॥ धर्माविरुद्धत्वमेवाधिकरणभावः॥ भिन्नाधिकरणत्वं परस्परात्यंताभा
वनियतत्वं वा॥ वाच्यं॥ तन्नुनोपपद्यते॥ पक्षित्रस्यापि भेदग्रहाधीनग्रहत्वेन अन्योन्याश्रयापातात्॥ नाप्यन्योन्याभाव इति तृतीयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद

तैत्रप्रतियोग्यनिरूपणात्॥ तथाहि॥ तत्र घटभेदस्य तद्भेदविरोधित्वात्॥ घटपटयोर्भेदो नाम अभेदो नास्तीत्यर्थ इति विवरणेन धिकार
तद्भावासंसर्गाभावपरत्वप्रतीत्या च तद्भेदप्रतियोगित्वस्तु तपये घटो न भवतीति प्रतीत्या प्रतियोगिकत्वं अहोस्विदुभयप्रतियोगि
कत्वं॥ आद्ये किमभेदो घटस्वरूपः उत तत्तादात्म्यं किंवा घटत्वं॥ नाद्यः॥ घटवति भूतले घटान्योन्याभावप्रसंगात्॥ तद्विरोध्यभे
दरूपघटस्य सत्वात्॥ न द्वितीयः॥ किं तादात्म्यमपि घटरूपं तदतिरिक्तं वा॥ नाद्यः॥ उक्तदोषानतिवृत्तेः॥ न द्वितीयः॥ किं तत्र प
टो घटाभिन्न इति॥ धीः प्रमाणं॥ उत घट इति धीः॥ नाद्यः तस्या भेदाभावविषयत्वेन तादात्म्याविषयकत्वात्॥ न च भेदाभाव
तादात्म्यमिति वाच्यं॥ किं विरहरूपाभावस्वरूपमेव तत्तादात्म्यं घटाभाववत्॥ घटाभावाभावरूपघटाभावस्वरूपं॥ नाद्यः
भेदरूपप्रतियोगिज्ञानानंतरं तदभावरूपतादात्म्यज्ञानं तादृशतादात्म्यरूपप्रतियोगिज्ञानानंतरं तदभावरूपभेदज्ञानमित्यन्योन्या
॥१५॥ श्रयग्रस्तत्वेन एकस्याप्यसिद्धिप्रसंगात्॥ विरहस्वरूपाभावप्रतियोगिकविरहस्वरूपाभावानभ्युपगमाच्च॥ ननु तर्हि अत्यपक्षोऽस्तु ॥१५॥
तत्र यथा घटाभावरूपप्रतियोगिज्ञानाधीनं घटाभाववत्त्वोपस्थितिं विनापि घटत्वेन घटो ज्ञायते इति नान्योन्याश्रयः॥ तथा भेद
रूपप्रतियोगिज्ञानाधीनाभावत्वोपस्थितिं विना तादात्म्यं प्रकारांतरेण ज्ञातुं शक्यत इत्यन्योन्याश्रयाभावात् इति चेन्न॥ घटे घटत्व

वत्॥ तत्राभावरूपधर्मे प्रमाणाभावेन उक्तदोषतादवस्थ्यात्॥ अतो घटो पटाभिन्न इति प्रतीतेर्भेदाभावमात्रविषयकत्वेन भाव
रूपधर्माविषयकत्वात्॥ घटो घटाभिन्न इति बुद्धिः स्वरूपातिरिक्तभावतादात्म्ये न प्रमाणं॥ नापि घट इति बुद्धिः तत्र प्रमाणमिति
त्यपक्षः॥ तस्याः घटघटत्वतद्वैशिष्ट्यमात्रावगाहित्वेन तदन्यावगाहित्वात्॥ किंचायं घट इति ज्ञाने तादात्म्यं प्रकारतया भासते॥
अ प्रकारतया वा॥ नाद्यः॥ घटस्येव प्रकारतया भानेन तद्दसिद्धेः॥ नांत्यः॥ तत्रापि सविकल्पमात्रे प्रकारतया भासते॥ स्वगोचरनि क
रा विकल्पकं अन्यो वा॥ नाद्यः॥ घटत्वस्मृतिजन्यघटसविकल्पे तस्य भानाभावेन प्रकारत्वासंभवात्॥ नांत्यः॥ तत्रापि तादात्म्यं स
खंडमखंडं वा॥ नाद्यः॥ तस्य विशिष्टरूपस्यानिर्विकल्पकायोगात्॥ निरंकुशमशक्यत्वाच्च॥ नांत्यः॥ तत्रापि तदखंडं नित्यमनित्यं वा
नाद्यः॥ तेनैव जातिप्रयुक्तव्यवहारोपपत्तौ मानाभावेन जातिमात्रविलोपापत्तेः॥ नांत्यः॥ रूपादिषु भावकर्मपस्य तस्यासत्वेन रूपा
दिप्रतियोगिकभेदानुपपत्तेः॥ अन्यथा रूपादेस्तत्रसमवायिकारणत्वं स्यात्॥ तत्समवायिकारणांतराभावात्॥ किंच तादात्म्यं
सखंडमखंडं वास्तु॥ उभयथापि सामान्यादेरनवस्थयाभावधर्मानाश्रयत्वेन तत्प्रतियोगिकभेदानुपपत्तेः॥ तस्मात् घट इति
बुद्धिः स्वरूपातिरिक्ततादात्म्ये न प्रमाणं॥ नन्वभेदो घटत्वमित्यंत्यपक्षोऽस्तु इति चेन्न॥ अपाभेदस्य तद्भेदरूपघटत्वाभावत्वे घटत्व
स्य घटाभावत्वाभावविरोधितया तदनधिकरणत्वेन घटस्यैव घटभेदप्रसंगात्॥ न च घटत्वस्य स्वाभावविरोधित्वे तदसमाना

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेर धिकरण्यमेव प्राप्तं घटवत्। ननु तद्दनाधारत्वमिति वाच्यं॥ घटाभावे घटाभावस्य स्वाभावरूपघटाधारताविरोधित्वदर्शनेन घ घिक्कार
त्व टत्वस्यापि स्वाभावाभाववत्वेन तद्दनाधारस्यावश्यकत्वात्॥ न चाभाव एवायं नियमन भावइति वाच्यं। लाघवेन भावाभावसा
धारणाभावत्वस्यैव स्वाभावाधारताविरोधित्वात्॥ विरहरूपाभावत्वस्य गौरवेण तथात्वात्। न च तर्हि घटत्वस्य स्वभावाना
धारत्वे घटत्वं नास्तीति प्रतीत्यानापत्तिरिति वाच्यं॥ घटाभावे घटो नास्तीति प्रतीतिवादकत्वांशे भ्रमत्वौ विशेषणीभूतघटत्वा वि
धारत्वेन यथार्थत्वसत्त्वोपपत्तेः न चैवं भूतले घटो नास्तीति बुद्धेरपि भूतलाधारत्वांशे भ्रमतापत्तिरिति वाच्यं। तत्र भूतलस्य
घटाभावत्वाभावेन विरोधाभावात्॥ न च घटत्वस्य घटत्वाभावानाधारत्वे घटत्वे घटत्वप्रसंगः॥ विरुद्धयोरन्यतराभावेप्यन्यतरसत्त्वस्यावश्यक
त्वात्॥ नित्यत्वानित्यत्ववदिति वाच्यं॥ घटाभावे व्यभिचारेणोक्तनियमासिद्धेः। उभयाधिकरणयोग्य एव अन्यतराभावे अन्यतरविधिरिति
यमात्। नित्यत्वानित्यत्ववत्। अत्र चाविरोधिनोभयाधिकरणत्वयोग्यत्वाभावात्॥ वस्तुतस्तु घटत्वं न घटाभेदः घटाभिन्नत्वात्॥ पटत्ववत्।
॥१७॥ अन्यथा घटे घटाभेदः घटत्वं चेति प्रतीतिर्न स्यात्। तस्मान्न घटत्वं घटाभेदः॥ न च मास्तु घटाभेदो घटत्वं तथापि घटभेदप्रतियोग्यस्त्विति ॥१५॥
वाच्यं। अभेदे प्रथमनिवर्तनेनायं देवदत्त इतिवत् भूतले भूतलं घटो नेत्याभेदमारोप्य तस्य निषेधेन घटाभेदप्रतियोगित्वेन घटत्वप्रतियो
गित्वाभावात्॥ प्रतियोगितावच्छेदकघटत्वप्रकारकज्ञानाभावेन भूतलं घटेन भवतीति प्रतीतेः सर्वानुभवसिद्धत्वया तस्य घटत्वप्रतियो

गिकत्वानुपपत्तेश्च॥ तस्मान्न घटाभेदो घटत्वं॥ अथ घटभेदप्रतियोगीति वक्तुमशक्यमिति सिद्धं॥ ननु तर्हि घट एव घटभेदप्रतियोगीति द्वि
तीयपक्षोऽस्तु इति चेन्न। तथात्वे तस्य घटासत्ताभावाद्भेदो न स्यात्॥ प्रतियोगितावच्छेदकभेदाभावात्॥ न च प्रागभावादिभेदवत् प्रतियोगिता
वच्छेदकभेदाभावात्॥ न च प्रागभावादिभेदवत्प्रतियोगितावच्छेदकभेदाभावेपि तद्भेदोस्त्विति वाच्यं॥ प्रागभावस्थलेपि कालविशेषमा
दाय प्रतियोगितावच्छेदकभेदस्य तथाभ्युपगमात्॥ अन्यथा घटात्यन्ताभावस्य अनंतत्वापत्तेः॥ न च प्रतियोगितावच्छेदकभेदाभावे
पि अत्यन्ताभावयोरन्योन्याभावयोरारोप्यसंसर्गाभेदरूपसंबंधभेदमादाय अभावभेदोस्तु॥ अत एव समवायारोप्यकत्वे अन्यो
न्याभावोपि अन्य एवांगीक्रियत इति वाच्यं॥ तथात्वे नानंताभावकल्पनापत्त्या समवायेन वह्निर्नास्तीति समवायस्य प्रकारतयाभाना
ना त्स्यासंबंधत्वेन चारोप्यसंबंधेन अभावभेदो नास्तीति असमवायानुमानस्यापकाशोपपत्तित्वात्॥ किंच भूतलं घटो नेत्यत्र किमा
रोप्यभेदसंबंधः प्रतियोग्यैव किं वा तदतिरिक्तः कश्चिद्धर्मः तादात्म्यं घटत्वं वा॥ नाद्यः॥ अभेदस्य स्वरूपमात्रस्य संबंधत्वाभावात्
अन्यथा निर्विकारस्यापि स्वरूपमात्रावगाहिनः स्वरूपमात्रपर्यवसानाभेदरूपसंबंधावगाहित्वेन विशिष्टज्ञानत्वापत्तेः॥ घटे घटः॥
घटस्य घट इति वा॥ प्रतीत्यापत्तेश्च॥ किंचात्र नाभेदसंबंधः तथात्वे घटवति भूतले घटभेदो न स्यात्॥ भेदस्य घटस्वरूपत्वे न तत्र घटस्वरूप
स्यसत्त्वेन तदारोप्यतन्निषेधाभावात्। तादृशस्यासंबंधत्वाच्च॥ न द्वितीयः॥ घटातिरिक्तस्य तस्य निरस्तत्वात्॥ न तृतीयः॥ घटत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेद०

स्य तद्भेदाभावस्योक्तत्वात् ॥ भूतलं पटो नेत्यत्र घटत्वस्य प्रकारतया भाने तु आरोप्यसंबंधतयायोगात् । अतो नारोप्यसंबंधघभेदादपि पिकार
न घटात्यंताभावतदन्योन्याभावयोर्भेदः ॥ किंच घटभेदं प्रति घटस्य प्रतियोगित्वे तद्भेदस्य तत्सामानाधिकरण्यानुपपत्तिः । प्रतियोगितदभाव
योर्विरोधात् ॥ अत एव केवलं प्रतियोगिमात्रमभावविरोधि अतिप्रसंगात् ॥ किं तादात्म्यसंबंधघटता ॥ तथा च भूतले घटो नेत्यत्र भूतला
रोप्यघटाभावसंबंधाभावात् न घटविरोधित्वं तद्भेदस्येति निरस्तं ॥ अभेदस्यासंबंधत्वात् ॥ न चात्यंताभावस्यैव प्रतियोगिविरोधि
त्वं न त्वन्योन्याभावस्य ॥ किंतु तस्य प्रतियोगितावच्छेदकेनैव विरोध इति परास्ति इति तेनोक्तदोष इति चेन्न ॥ इदानीमयं घटः श्यामो न भ
ति अयं घटः स्थूलो न भवति इत्यादिप्रतीतेरभेदस्य प्रतियोगितावच्छेदकसामानाधिकरण्यानुभवेन भेदस्य प्रतियोगितावच्छेदक
तैव विरोध इत्यस्यासिद्धेः ॥ न चोभयत्र प्रतियोगितावच्छेदकात्यंताभावविषयकत्वं ॥ न त्वन्योन्याभावविषयकत्वं ॥ अभेदप्रत्यभि
त्वा ज्ञाविरोधादिति वाच्यं ॥ प्रत्यभिज्ञायां घटत्वेन वृक्षत्वेन चाभेदविषयकत्वेनोपपत्तौ तथाभेदप्रतीतेरन्यथासिद्ध्यनुपपत्तेः ॥ ॥१८॥
॥१८॥ अन्यथा पटादिभेदेपि दत्तजलांजलिः स्यात् ॥ भूतलं घटो नेत्यादिप्रतीतेरपि भेदप्रतियोगितावच्छेदकघटात्यंताभावविषयकत्वेनो
पपत्तेः ॥ न चात्यंताभावप्रतियोगितावच्छेदकघटत्वत्यज्ञानाभावेपि भूतलं घटो नेति प्रतीतेः सर्वानुभवसिद्धतया तस्याः घटत्वात्य
ताभावविषयकत्वसंभव इति चेत् तर्हि एकत्वेपि अत्यंताभावप्रतियोगितावच्छेदकश्यामत्वस्थूलत्वत्यज्ञानाभावेपीदानीं घटस्या

प्रतीतेरपि सर्वानुभवसिद्धत्वेन तस्यापि तदत्यंताभावविषयकत्वायोगात् ॥ अतः प्रतियोगितावच्छेदकेनैव विरोध इत्यसिद्धं ॥ किं
च विभ्वोन्योन्याभावेपि प्रतियोगिविरोधित्वदर्शनेन लाघवेन चाभाववत्वस्यैव प्रतियोगिविरोधित्वव्याप्यत्वेन अन्योन्याभावस्य
प्रतियोगिविरोधित्वाभावे अभावत्वमेव न स्यात् ॥ किं च भूतलं घटो नवेति अभेदसंशये तन्निरासार्थं भूतलं घटो नेत्यभेदस्यैव निषेध
प्रतियोगितया प्रतीतेर्न घटस्य प्रतियोगिता तन्मतात् घटभेदस्य न घटोपि प्रतियोगीति सिद्धं ॥ ननु घटभेदस्य घटतदभेदोभय
प्रतियोगिकत्वमिति तृतीयः पक्षोस्तु अत्र च प्रतियोगितावच्छेदकभेदसत्वेन घटात्यंताभावतदन्योन्याभावयोर्भेदसंभवात् ॥ चे
अभेदमादाय प्रतियोगिविरुद्धत्वस्य निषेधस्य तत्प्रतियोगिकत्वप्रतीतेश्च ॥ अविरोधाच्चेति तदप्ययुक्तं ॥ घटतदभेदयोर्भेदप्रतियो त
गितावच्छेदकभेदेन उभयप्रतियोगिकभेदस्यापि भेदोपपत्तेः ॥ तयोर्भेदभानाभावात् ॥ घटाभेदस्यैव इत्वे पटादिवत् तदभेद
त्याभावस्योक्तत्वाच्च ॥ तयोरभेदे च पूर्वोक्तदोषतादवस्थ्यात् ॥ तस्मादन्योन्याभावे प्रतियोगिस्वरूपं निरूपयितुं शक्यमिति
सिद्धं ॥ एवं भेदधर्मिणोरपि दुर्निरूपत्वं ॥ तथाहि ॥ घटप्रतियोगिकभेदस्य पटादिरेव धर्मी न घट इत्यत्र मानाभावात्
न च पटादौ घटभेदप्रतीतेः पटादिरेवाधिकरणं न घटः ॥ तत्र तदप्रतीतेरिति वाच्यं ॥ घटपटौ भिन्नाविति घटनिष्ठतयापि तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतीतेः॥ त्वन्मते भेदांस्यात्तथा तस्यप्रतीतेश्च॥ नचपटादावेव तत्प्रमितेस्तदपि करणमितिवाच्यं॥ आश्रयानिरूपणेन भेदस्यक्वापिस
त्वायोगात्॥ तत्प्रमितिः सर्वाप्यप्रमेतिवदंतं प्रति तदाश्रयानिरूपणेन तत्प्रतीतिप्रमात्वस्य साधनीयतया तदाश्रयसिध्यनंतरं तत्प्रमा
त्वसिद्धिः तत्सिध्यनंतरं तत्सिद्धिरिति अन्योन्याश्रयप्रसंगात्॥ नचपटादौ घटभेदप्रमस्य बाधात् पटादिरेव तदधिकरणं न घटादि
य तस्य तस्य घटो न पटादिर्नेत्यश्रुति बाधादिति वाच्यं॥ पटेप्यस्यैकश्रुतिप्रयोजकस्य बाधितत्वात्॥ किं च घटादपि तद्भेदसंसर्गस्य
अप्यासत्वेन तद्भेदसत्वावश्यकतया तद्बाधप्रतीतेरेव बाधितत्वं॥ न च पटे तद्भेदसंसर्गसत्वमसिद्धमितिवाच्यं॥ त्वन्मते भेदतदधि
करणयोः स्वरूपमेव संसर्गः॥ तदतिरिक्तो वा॥ नाद्यः॥ घट पटभेदस्वरूपवत् घटतद्भेदस्वरूपसंसर्गस्याप्युभयोरयोगात्॥ विशि
ष्टप्रतीतिरप्युभयत्र तुल्यस्वेन तन्नियामकत्वस्वरूपस्वरूपसंबंधस्याप्यविशेषात्॥ तस्मात् अबाधितप्रतीत्या दुर्निरूपितत्वेन न तत्प्र
त टितस्य तस्यासंभवात्॥ न द्वितीयः॥ पटादिस्वरूपानुगतत्वेन अनुगतभेदबुध्यनियामकत्वात्॥ घटेपि तत्कल्पकविशिष्टप्र
॥१९॥ तीत्याविशेषणतत्स्वरूपस्यापि तत्संबंधत्वाच्च॥ न तृतीयः॥ तत्रापि भेदनियामकसंसर्गभेदस्योपलक्षणं त्वविशेषणत्वं वा नाद्यः ॥२१॥
घटव्यावृत्तानुगतोपलक्ष्यतावच्छेदकाप्रसिद्ध्यात्॥ न च घटभेदस्यैवोपलक्ष्यतावच्छेदकतेति वाच्यं॥ संसर्गितद्भेदस्य तद्भेदस्य वा

तथात्वानुपपत्तेश्च॥ वक्ष्यमाणविशेषणत्वपक्षदोषात्॥ नांत्यः॥ तत्रापि विशेषणीभूतोयो भेदः स किं संसर्गभेदः एव ततोन्यो वा॥ नाद्यः॥ आ
ह त्माश्रयापत्तेस्तस्य नियामकत्वायोगात्॥ घटादिरितिप्रतीत्या तत्स्वरूपस्यापि तत्संसर्गस्य व्यवहितयात द्यावर्तनियामकविशेषणाभावा
~~[illegible]~~ नानुपपत्तेश्च॥ नांत्यः॥ तत्रापि संसर्गविशेषणतया न नियामको भेदस्तस्य एव वा किंतु तत्प्रथमतृतीयो वा वा॥ नाद्यः॥ प्रागु
क्तदोषात्॥ न द्वितीयः परस्पराश्रयापत्त्यापरस्परं प्रति परस्परयोर्नियम्यनियामकभावानुपपत्तेः॥ न तृतीयः॥ तत्रापि तत्संसर्गविशे
षणतयान्योभेदः तस्याप्यन्यः कल्पनीय इति प्रागुक्ताप्रामाणिकानंतभेदकल्पनाप्रसंगात्॥ न च प्रामाणिकत्वादनंतभेदकल्पना
न दोष इति वाच्यं॥ घटभिन्नः पट इत्यत्र भेदांतरस्यानुभूयमानत्वात्॥ एकभेदेनैव प्रतीत्युपपत्तेश्च॥ किं चानंतभेदकल्पनेपि तेषु
कस्य भेदस्य संसर्गविशेषणतया नियामकत्वं॥ कस्य भेदस्य संसर्गितया नियामकत्वं॥ विनिगमकाभावात्॥ अतः सर्वेप्यसंसृष्ट
भेदाः स्युरिति घट इव सर्वत्र तत्ज्ञानं प्रतीतिरेव स्यात्॥ घटेपि वा प्रमा स्यात्॥ न च पूर्वपूर्वभेद उत्तरोत्तरसंसर्गविशेषतयान्निया
मक इति वाच्यं॥ सर्वेषामनादित्वेनैककालीनतया पौर्वापर्यानुपपत्तेः॥ नाद्यः॥ घटाद्यत्यंताभावधर्मिणोपि घटभेदधर्मिनिरूपण
पक्षोक्तदोषस्य सर्वस्य तुल्यतयानिरूपयितुमशक्यत्वात्॥ नापि स्वरूपातिरिक्त एव भेद संसर्ग इत्याद्यनंतविकल्पः॥ त्वन्मते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकार

स्वरूपातिरिक्ताभावे संबंधानभ्युपगमात्॥ अभ्युपगमे वा तस्यापि घटभेदाश्रयतया संबंधांतरमावश्यकमिति सं
बंधानवस्थापत्तिः॥ अतिरिक्तसंबंधस्य द्व्याद्यन्यतमत्वाभावेन असंभवाच्च॥ अतो भेदधर्मिणोपि दुर्निरूपत्वमिति सिद्धं॥
एवं तत्स्वरूपमप्यशक्यनिरूपणमिति सिद्धं॥ तथाहि॥ न तावदन्योन्याभावत्वं जातिः अप्रसिद्धांतात्॥ नाप्युपाधिः॥ स किं
मखंडः सखंडो धर्मः॥ पदार्थांतरं स्यात्॥ यदि क्लृप्तावयवगुणादिभिन्नं यत्तेन सादृश्यप्रतीतिव्यवहारोपपत्तौ न पदार्थांतरं ता
दृक्कल्प्यात्॥ तदात्रापि अभेदाभावमात्रगोचरतया तत्प्रतीतिव्यवहारोपपत्तौ तदतिरिक्ताखंडधर्मासिद्धिरिति तुल्यं॥ नांत्यः॥
निरंकुशमसाध्यत्वात्॥ न तावत्प्रतियोगिसमानदेशाभावत्वं तत्॥ अव्याप्यवृत्त्यंताभावातिव्याप्तेः॥ विभ्वन्योन्याभावा
व्याप्तेश्च॥ न च काले विभ्वन्योन्याभावस्यापि प्रतियोगिसमानदेशत्वमस्तीति वाच्यं॥ तर्हि तदत्यंताभावातिव्याप्तेः
॥२० यत्तु प्रतियोगिसमानाधिकरणाभाववृत्तित्वे सत्यभावत्वसाक्षाद्व्याप्यधर्मोन्योन्याभावत्वं॥ एवं च विभ्वन्योन्याभाव ॥२०॥
गतान्योन्याभावत्वं तादृशानव्याप्य च सत्यंताभावत्वात्॥ मैवं॥ तस्य साक्षादभावत्वव्याप्यत्वाभावादिति॥ तन्न॥

त्वा
तादृशासंसर्गाभावत्वाश्रयात्यंताभावादेरपि अन्योन्याभावत्वप्रसंगात्॥ भेदमात्रस्य प्रतियोगिनि षिद्धत्वेन प्रतियोगिसामान्या
धिकरण्यासिद्धेश्च॥ किंच तादृशधर्मः स खंडः किमखंडो वा॥ नाद्यः॥ न स्येदमिदं नेति प्रतीत्यविषयत्वात्॥ अतएव द्वितीयः॥ तस्यानिरु
त्य क्तत्वाच्च॥ नापि प्रतियोग्यवृत्त्यंताभावत्वं तत्॥ अन्योन्याभावस्य अव्याप्यवृत्तित्वस्य साधितत्वेन तत्राव्याप्तेः॥ अत्यंताभावस्यापि प्र
तियोग्यवृत्तित्वस्योक्तत्वेन तत्रातिव्याप्तेः॥ इमौ भिन्नाविति भेदप्रतियोग्यभावाच्च॥ भेदद्वयं च निराकरिष्यते वस्तुतस्तु घटभेदस्य
त्वन्मते घटघटत्वोभयप्रतियोगिकत्वाभ्युपगमेन घटभेदस्य घटत्वरूपप्रतियोगिवृत्तितया लक्षणस्यासंभवः॥ नापि तादात्म्या
रोपजन्यज्ञानविषयाभावत्वं तत्॥ तादात्म्यप्रतियोगिकात्यंताभावातिव्याप्तेः॥ घटातिरिक्तः तादात्म्याभावेन तदत्यंताभावाति
व्याप्तेः॥ तत्र जन्यतावच्छेदकापरिचयाच्च॥ नापि संसर्गारोपजन्यप्रतीत्यविषयाभावत्वं तत्॥ पटे घटभेदो नास्तीति घटभेद
संसर्गारोपजन्यप्रतीतिविषयत्वेन पटे घटत्वं नास्तीति घटत्वसंसर्गारोपजन्यज्ञानविषयत्वेन घटान्योन्याभावाव्याप्तेः॥
नापि प्रतियोगितावच्छेदकारोपजन्यप्रतीतिविषयाभावत्वं तत्॥ प्रतियोगितावच्छेदकस्य तादात्म्यमन्याश्रयस्याभावात्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद०

ने
घटत्वस्य तस्य प्रकारतयाभावेन स्यात् त्रेणारोपसंभवात् तत्प्रकारतयाभानस्य संसर्गमर्यादयाप्यारोपायोगात् अ धिकार
न्ये वृक्षः संयोगवान्नेति प्रतियोगितावच्छेदकसंयोगाद्यारोपजन्यज्ञानविषयसंयोगाद्यंताभावेतिव्याप्तिश्च तस्मा
भे भेदस्वरूपमपि निर्वक्तुमशक्यमिति सिद्धं॥ किंच पटेऽपि घटप्रतियोगिभेदस्य घटाद्भेदोस्ति न वा॥ नाद्यः॥ घटो
भेद इति व्यवहाराद्यापत्तेः॥ घटस्य भेदे इति प्रतियोग्यनुयोगिभावाद्यनुपपत्तेः घटरहितभूतले घटभेद इव वा २
धितत्वे संयोगाद्यनापत्तेश्च॥ तत्र घटाभावेन तद्भिन्नत्वेऽबाधाभावात् द्वितीयः॥ स किं धर्मीभूतपटनिष्ठभेदाला
तदन्यो वा नाद्यः॥ तस्य निराकरिष्यमाणत्वात्॥ नांत्यः प्रतियोगिभेदाभावेन॥ भेदद्वयानुपपत्तेः॥ अधिक
रणभेदेनाभावभेदानभ्युपगमात् तथात्वे वा पटेऽपि सत्त्वं स्यात् बाधकाभावात् द्वन्द्वसाधकाभावत्वात्तस्य
॥२१॥ व बाधकत्वाद्वदेषु भेदप्रतीतेः प्रथमभेदमादायोपपत्तेश्च नपटे घटप्रतियोगिकद्वितीयभेद इति वाच्यं ॥२१॥
अधिकरणभेदस्यैवाभेदे नियामकतया विनिगमकाभावेन पटो घटो नेति प्रतीतेः पटनिष्ठघटप्रतियो घट
भावाद

गिकभेदमात्रविषयकत्वस्यावश्यं वाच्यत्वात्॥ घटतानिष्ठघटभेदो घटादिभाववेति भेदनिष्ठभेदस्यै
व अन्यस्यापि पटेऽपि प्रतीयमानत्वाच्च॥ पटस्य द्वितीयभेदोऽपि स्यादेव एवं घटप्रतियोगिक ती
द्वितीयभेदे घटप्रतियोगिकतृतीयभेदस्यावश्यकत्वे तयोक्तन्यायेन घटेऽपि न स्यात्तच्च तत्तृती
यभेदो नास्येव मानाभावात्॥ द्वितीयभेदे घटादिभिन्न इति प्रतीतेश्च प्रथमभेदविषयकत्वादिति वाच्यं
तथा सति प्रथमभेदस्य द्वितीयभेदनिष्ठत्वापत्तौ परस्परानाश्रयप्रसंगात् न चेष्टापत्तिः उक्त स्यादि
प्रतिबंधकत्वाभावात् असंयत्वाभिधानं यादिवादिवाच्यं प्रैविषयत्वातिरिक्तं प्रमेयं॥ मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद०

धिकार

त्याच्च निरूपणात् तस्य च स्वरूप संबंधात्मनः परमतेपि नानात्वं यावत्प्रतीति तदभ्युपगमेना
वेस्थासंभवाच्च तद्दूषणं तेन परस्य राश्रयाभ्युपगमात् प्रथमं द्वितीय भेदो च यान्द्विभागि
शे त्ति तयोर्विषयोर्युगपद्भासमानयोर्विशेषणत्वेनाभानं योगिनां विशेषणाचेन
भासमानस्य त्व। तीयभेदावश्यकत्वाच्च यगं द्विशे[illegible]ष्याभावयोरैक्यमपराधं प
जीवेश्वरैक्यमनु एवं पटे द्वितीभेदो कृतीया तृतीयभेदः प्रथमभेदेपि [illegible]स्यात् ततश्च ॥२२॥
॥२२ तुर्थादिरप्यखंडोतेः स्यादित्ये क स्य अंतःप्रमाणिक भेदप्रसंगः एवं भेदेष्वन्यो

न्यप्रतियोगिकानंतभेदापत्तेः॥ धोतेघटे धर्मिणि प्रतियोगिघटे चैकैकभेद प्रतियोगिकानंतभेदकल्पना
पत्तेः॥ अतोविलक्षणभेदांगीकारो न युक्तः एवमप्यसंताभावो विलक्षणान्योन्याभावो किंचिल्लमा न
प्र णं॥ नन्वसंताभाव प्रतीति विलक्षण प्रतीतिरेवल प्रमाणमिति चेन्न॥ किं तत्प्रतीतिवैलक्षण्यं॥ वि
षयवैलक्षण्यात्प्रतियोगितावच्छेदकप्रतिसंसर्गारोपस्वरूप कारणवैलक्षण्याद्वा॥ नाद्यः तत्रापि किं भू थ
तले घटो नेति प्रतीतेः॥ विषयवैलक्षण्यप्रयुक्तवैलक्षण्यमुच्यते किं द्वयोरभिन्नाविति प्रतीतेः अथवा भूतले घ
टाद्भिन्नमितिप्रतीतेर्वा नाद्यः तत्प्रतीतेरभेदमारोप्य तस्य निषेधेन भूतलघटयोरभेदो नास्तीति विव
रणेनाभेदासंताभावविषयतया त्वदभिमतासंताभावविलक्षणादविषयत्वात् अतएव न द्वितीयः भूतले ती
त् घटो भिन्नो भिन्नस्य तयोरभेदो नास्तीति विरवयेतदसंताभावगोचरत्वात् इमौ भिन्नाविति धार्मप्रतियोग्यभया
भिन्नभेदस्यैव प्रतीयमानत्वेन त्वदभिमतप्रतियोग्यवृत्तिभेदसिद्धेश्च न चेमौ भूतलघटौ भिन्नाविति प्रतीतेर्भूतलघ
टप्रतियोगिकभेदः घटे च भूतलप्रतियोगिकभेदः प्रतीयत इति नोक्तदोष इति वाच्यं त[illegible]त्र भेदद्वयक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल्पनेगौरवान्मानाभाववादेकेनैवप्रतीत्युपपत्तेश्च॥ अन्यथा विभक्तौ संयुक्तावित्यत्रापि विभागद्वयस्यापि वक्त्र धिक्का।
लेपत्वप्रसंगात्॥ एवं नास्य पक्षोपि भूतलं घटवद्भिन्नमि[illegible]स्यतयोर्भेदो नास्ति एतेभिन्न[illegible]यादि विवर
णेन तादभिन्नत्व भेदाविषयत्वात्॥ नाप्याद्यद्वितीयः तथापि कारणवैलक्षण्यासाधकत्वात् प्रत्युत का
र्यवैलक्षण्यस्य प्रसक्तानुमानजन्याभावबुद्धिवैलक्षण्यं तद्विषयवैलक्षण्यासाधकत्वात्॥ प्रतियोगितो
वच्छेदकारोपजन्यतावच्छेदकापरिचयाच्च॥ न चोन्योन्याभावे गोचरसंभव तदिति वाच्यं वासिध्यनंतरमुक्त
प्रतीतिवैलक्षण्यप्रयुक्तः तत्सिध्यनंतरं तद्बुद्धिरिति अन्योन्याश्रयप्रसंगात्॥ किं चारोपस्याभावबुद्धिं प्रति
अन्वयव्यतिरेकाभ्यां कारणत्वं आरोपानंतरमेवाभावबुध्यनुभवाद्वा उतोभावबुद्धिव्यपैलक्षण्या
ति ह्लानाद्यः अधिकरणग्रहप्रतियोगिस्मरणतदनुपलब्धिरूपसामग्र्यासत्त्वेतद्व्यतिरेकाभावात् न द्वितीयः भूत
ले घटो न भूतले घटो नेति भूतले घटाभावसंसर्गस्यैवानेभवनारोपानंतरं तदनुभवासिद्धेः तस्माल्लाघवेन गौर ॥२२॥
॥भूत॥ वान्मानाभावाच्च न च प्रसक्तस्य कथं निषेध इति वाच्यं बुद्धौ प्रसक्तिमात्रेण तदुपपत्तेः अधिकरणे प्रस
क्तिरावश्यकीयत्वे मानाभावात् नासत्प्रमेयवैलक्षण्याभावे नाभावबुद्धौ वैलक्षण्यासंभवात्॥

भूतलं घटो नेत्यस्याभेदमारोप्यनिषेधेन घटाभाववद्भूतलमित्यर्थकतया घटाभावविषयत्वात्॥ तन्मते अ
द्वेभेस्य च घटानतिरेकात्॥ भूतले घटो न भूतले घटो नेति प्रतीतेर्वैलक्षण्यस्य घटाभावस्य विशेषणविशे भूतले
ष्यभावप्रत्ययमात्रेणोपपत्तेः॥ ता च न्यायेनारोपभेदकारणत्वे घटाभाववद्भूतलं घटो नेति प्रतीत्यारप्या
दा रोपभेदकारणत्वोपादानात्॥ अतोभावज्ञानेनारोपः कारणं॥ वस्तुतस्तु भूतलं घटो नेत्यस्यान्योन्याभावे
नास्तु मम हेति घट भूतले घटाभावनिश्चयाभावस्य भेदसंशयतद्व्यतिरेकनिश्चयवशाद्यां भूतले घ
टाभावस्य सर्वानुभवसिद्धत्वया यत्संशयव्यतिरेकनिश्चयाविरहितवदाभिन्नतान्यायेनानुमितौ
व्याप्तिज्ञानवद्भूतलधर्मिकघटप्रतियोगिकभेदनिश्चये घटधर्मिकभूतलप्रतियोगिकनिश्चयस्य
हेतुत्वं वाच्यं तथोक्तन्यायेन भूतलनिष्ठघटभेदनिश्चयस्यापि घटनिष्ठभूतलभेदनिश्चये तु त्वं वा
सं च्यमित्यन्योन्याश्रयप्रसक्तत्वात्॥ न च घटनिष्ठभूतलभेदसंशयस्य ग्राह्यसंशयतया न प्रतिबंधकेति वाच्यं॥
तद्भेदस्य त्वन्मते भूतलनिष्ठघटभेदादन्यत्वेन ग्राह्यत्वाभावात्॥ न च भूतलं घटो नेत्यत्र भूतलप्रतियोगिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घटनिष्ठभेदोपिसमानसंविसंवेद्यतयाभासतइतितस्यापिग्राह्यत्वापत्त्या स्वत्वाभिति वाच्यं असंनिकृष्ट
घटस्थले संनिकृष्टभूतले भूतलं घटेनेतिप्रतीतेः धर्मिणो घटस्यासंनिकृष्टत्वेन न तद्धर्मिकभूतल
भेदविषयत्वायोगात् विशेष्यांशे चक्षुज्ञानप्रसक्तेरभावात् ॥ तस्यान्यथानिरस्तत्वात् भूतलं घटो नेति
प्रतीतो घटस्य विशेष्यतयाभानाभावाच्च ॥ न च घटभूतलभेदसंशयतदतिरेकनिश्चयदशायां न घटतुभू
तलदोषप्राप्तीसंधानादेव भूतले घटभेदनिश्चयाभावो ननु तत्संशयादिप्रतिसंधानादिति वाच्यं तस्य संशया
दावन्यथासिद्धत्वेन न तत्प्रतिबंधकत्वाभावेन तत्संशयादेर्नेव प्रतिबंधकत्वावश्यंभावात् न च प्रतियोगि
नि धर्मिभेदनिश्चयो न हेतुः ॥ येनान्योन्याश्रयः ॥ स्यात् किंतु तत्र धर्मिकावच्छेदकाभावनिश्चय एव
॥२४ हेतुरिति वाच्यं उभयसंशयादौ सति धर्मिणि भेदनिश्चयाभावादिति गमकाभावेन निश्चयद्वयस्यापि ॥२४॥
तत्र हेतुत्वात् ॥ वस्तुतो वृक्षद्वयस्य भेदसंशयनिश्चयदशायां मूलावच्छिन्नैकवृक्षस्याग्रावच्छिन्नापरवृ
क्षस्येपरस्परधर्मितावच्छेदकमूलाग्रावा तयोरभावस्यान्योन्यस्मिन्निश्चयेपि तयोर्भेदनिश्चया

दर्शनात् ॥ निश्चयस्य हेतुः किं धर्मितावच्छेदकाभावज्ञानं अपिनसंभाति धर्मितावच्छेदकभूतलत्वाद्यभावज्ञानाभा
पि वस्यां भूतलनिष्ठभेदसंशयादौ सति सर्वसिद्धतया तज्ज्ञानेमेवज्ञाने हेतुरन्यदा न तज्ज्ञाने हेतुरित्यन्योन्याश्रयात्
धर्मितावच्छेदकभूतलत्वाभावज्ञानस्यप्रतियोगितावच्छेदकभूतलत्वाज्ञानाधीनतयातस्य च भूतले भेदघटित
यातज्ज्ञानाधीनत्वेनान्योन्याश्रयांतरात् प्रतियोगितावच्छेदकघटत्वादेर्धर्मिनिष्ठत्वाभावसंशयादिदशायाप्र
तियोगिधर्मितावच्छेदकाभावनिश्चया धर्मिणि प्रतियोगितावच्छेदकाभावनिश्चयस्य प्रतियोगिधर्मितावच्छे
वेछ कादभावनिश्चयो हेतुत्वं न तथा धर्मिणि प्रतियोगितौ भावनिश्चयस्यापि प्रतियोगिनि ॥ धर्मितावच्छेदकाभावनिश्चय
हेतुत्वेनान्योन्याश्रयांतराच्च ॥ किं चैतोपि भूतले न घटज्ञानं भूतले घटस्याभाव इति संशयादिदशायां तत्रतेज्ञ ८
दानतुभवेन तज्ज्ञानस्य तत्र हेतुतयैवं भूतले घटभेदसंशयादिदशायां तत्र घटत्वाभावनिश्चयेन त
या ज्ञानस्य तज्ज्ञाने हेतुत्वेन्योन्याश्रयात् भूतले व्यवहितघटभेदप्रत्यक्षे घटनिष्ठभेदप्रतियोगित्वविशेषणस्य तदंशे संनिकर्षा
तराभावेनानतज्ज्ञानस्येव संनिकर्षतया च भेदज्ञानप्रतियोगित्वज्ञानस्य हेतुतात्तस्य च भेदघटितस्य तज्ज्ञानाधानत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६० द तं पिकृा

यान्योन्याश्रयांतराच्च अतः समग्र्यभावाश्चान्योन्याभावप्रमासंभवतीतिसिद्धं॥ अतएव स्वस्वरूपमेव भेदः इत्ययं पक्षः॥ किंच
तत्वं किं प्रतियोगि स्वरूपमित्यर्थः किं धर्मिस्वरूपमिति भेवा॥ नाद्यः तस्य निरस्तत्वात्॥ धर्मधर्मिभावाद्यनुपपत्तेः॥ संबंधाभा
२ वात् न चाभेदस्य संबंधोस्ति वाच्यं तस्य निरस्तत्वात् भूतलं घटभेदावितिप्रतीत्यापत्तेः भूतलं भूतलं घटभिन्नमिति प्रतीत्या
र्विषयविशेषाभेदेनोल्लेखान्याश्रितिदिक्॥ तस्मोतिरिक्तो भेदस्वरूपावानसंभवतीतिसिद्धं॥ ननु ह्निलादुभयासंभवे सिद्धांते ती
वाकथं भूतलं घटो नेति प्रतीतिनिर्वाह इति चेन्न उक्तरित्या प्रतियोग्यादेर्निरूप्यत्वेन स्वरूपेन वादिवक्ष्यतीति वा भानाधिक्ये भेद
विषयत्वेन निर्वाह्यत्वात् न च माथिकभेदोवाकथं प्रतीतिविषयः तत्रापि योग्यनिरूपणतोल्लादिति वाच्यं न तावालिधांते प्राति
योग्यनिरूपणं॥ घटघटत्वाभेदस्य एतद्भेदप्रतियोगित्वात् न चसत्एवासिद्धांततरति वाच्यं अपोस्यतरानिरूपणेन भूतलं घटो ति
नेति तदुभयनिरूपितावच्छेदस्य प्रतियोगित्वप्रतीतेश्च परमतेपिपारमार्थिकघटस्वरूपस्यैव तदभेदत्वेनासमासिद्धांते चान्य ॥२५॥
त्रोपपादितत्वीभासच्चैतन्ये कल्पितप्रपंचपारमार्थिकस्वरूपतया घटपटाभेदात् अनन्यगत्या परेणाप्येवमेवांगीका
॥२५॥ रात्॥ परमतेपि तर्कितदुभयाभेदस्य प्रासिद्धेश्च॥ नचैवं घटयोर्द्वयोः प्रतियोगित्वभानानुपपत्तिः॥ घटावच्छेदस्य प्रतियो
त गित्वेन घटादर्पि कोटौ प्रविष्टत्वेन मदुपपत्तेः॥ नापि धर्म्यनिरूपणं तदभिमतधर्मिप्रतियोगिनोरुभयोरपि धर्मि

बं
त्वाभ्युपगमात् नापि भेदसंबंधानिरूपणं॥ ~~[illegible]~~ स्वरूपातिरिक्तावैशिष्ट्यसंबंधांगीकारात् नापि विलक्षण
भेदविलक्षणतत्प्रतीत्यानिरूपणं असंतताभावतत्प्रतीत्योरेवतद्रूपत्वेन तदनिरूपणस्येष्टत्वात्॥ नाप्यान्योन्याश्रयदोषः॥
भूतलघटनिष्ठाभावस्यैकतया तत्संशयस्याप्यसंशयतयोः प्रतिबंधकत्वात् यत्संशयव्यतिरेकानिश्चयाविति व्यासे
रप्रयोजकत्वाच्च अतएव न प्रतियोगितावच्छेदकाभावसंशयेदिश्ययुक्ता द्वितीयान्योन्याश्रयः॥ नापि प्रतियोगित्वज्ञानप्रयुक्ता या
न्योन्याश्रयः विशेषणज्ञानहेतुत्वज्ञानप्रत्यासत्योरन्यत्र निरस्तत्वेन तदनभ्युपगमात् चेन्नैवास्तवघटस्वरूपस्य
तदभेदत्वे तदभावरूपभेदस्य वास्तवत्वं न संभवति अद्वैतविरोधात्॥ नाप्यवास्तवत्वे प्रमाणाभावादिति वाच्यं नेह ना
नास्ति किंचनेत्यद्वैतश्रुतिपूर्वोक्तयुक्तिरूपबाधाभ्यां तस्यावास्तवत्वस्यावश्यमंगीकरणीयत्वात् अतएवतत्र प्रमा
तर्कि णखंडहानमतिष्टमेव अनिर्वचनीयस्य तत्स्वसाक्षीभास्यत्वात् न चैवं सर्वथा मानापातिः साक्षिणोनित्यत्वादिति वाच्यं धर्म्या
दिष्टस्य वाच्छिन्नचैतन्यस्य वासाक्षितयोक्तदोषाभावात् अतएव चक्षुरादिप्रमाणव्यापारस्य नैवेयर्थ्यं धर्मिज्ञानोप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेद

क्षीणत्वाद तस्माभ्देदपरीक्षयै वाद्वैतासिद्धेर्जीवेश्वरयो रभेदइति सिद्धं॥ इतिभेदधिक्कारस्समाप्तं॥ श्रीगजाननप्रा॥ पि.

२५॥ २॥

KKSU LIBRARY
RAMTEK
441 106
M-858
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 16:59
,TRANSFERRED=2020/10/22 at 17:02:48
,PAGES=26
,TYPE=STD
,NAME=S0004436
,Book Name=M-858-BHEDDHIKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection